नं. ५१११

शतपथ ब्राह्मणम्.
अष्टाध्यायीकाण्डम्

× × × ×

पत्र. ३८ —— सं. ४

संहिताब्राह्मणम्

शतपथब्राह्मणम्

कृष्णाध्यायी काण्ड (११ मं)

5111
starting from 5 to 41.
५१११
#1 to 4 MISSING.
F. = 37

स्मानपाठः

याः कामयते ता याज्यानुवाक्याः करोत्येवमाज्यभागावेवऽसंयाज्ये ॥९॥ तिस्रधन्वं द
क्षिणां ददाति ॥ धन्वना विश्वानं बाधं ततादत्तमेवैतद्बाधते यत्तिस्रधन्वं दक्षिणां
ददाति ॥१०॥ दण्डं दक्षिणां ददाति ॥ दण्डेन विश्वानं बाधं ततादत्तमेवैतद्बाधते य
द्दण्डं दक्षिणां ददात्यथ वाचा दिष्टा दक्षिणा ददद्यात्तां वास्या मप्यन्यं दद्यादितरा दक्षिणा
स्तासां यत्संपाद्येत सा हि पापमनो व्यष्टिस्तयाप्येनं पुनरिष्ट्वा यजेतेव ॥११॥ आपो
आपो ह वा इदमग्रे सलिलमेवास ॥ ता अकामयन्त कथं नु प्रजायेमहीति
ता अश्राम्यंस्तास्तपोऽतप्यन्त तासु तपस्तप्यमानासु हिरण्मयमाण्डं संब
भूवाजातो ह तर्हि संवत्सर आस तदिदं हिरण्मयमाण्डं यावत्संवत्सरस्य
वेला तावत्पर्यप्लवत ॥१॥ ततः संवत्सरे पुरुषः समभवत् ॥ स प्रजापतिस्त
स्मादु संवत्सरे स्त्री वा गौर्वा वडवा वा विजायते संवत्सरे हि प्रजापति
रजायत स इदं हिरण्मयमाण्डं व्यरुजन्नाह तर्हि काचन प्रतिष्ठास तदेनमि
दमेव हिरण्मयमाण्डं यावत्संवत्सरस्य वेलासीत्तावद्बिभ्रत्पर्यप्लवत ॥२॥ स
संवत्सरे व्याजिहीर्षत् ॥ स भूरिति व्याहरत्सेयं पृथिव्यभवद्भुव इति तदिदमन्त
रिक्षमभवत्स्वरिति सासौ द्यौरभवत्तस्मादु संवत्सर एव कुमारो व्याजि
हीर्षति संवत्सरे हि प्रजापतिर्व्याहरत् ॥३॥ स वा एकाक्षरद्व्यक्षराण्येव ॥

श्रा २

प्रथमं वदन्प्रजापतिरवदत्तस्मादेकाक्षरद्व्यक्ष[illegible]ण्येव प्रथमं वदन्कुमारो वदति ॥४॥
तानि वाऽएतानि ॥ पंचाक्षराणि तान्पंच ऋतूनकुरुत तऽउ इमे पंचर्त्तवः सऽएवमिमां
२ ल्लोकांजातांत्संवत्सरे प्रजापतिरभ्युदतिष्ठत्तस्मादु संवत्सरऽएव कुमारऽ
उत्तिष्ठासति संवत्सरे हि प्रजापतिरुदतिष्ठत् ॥५॥ स सहस्रायुर्जज्ञे ॥ स यथा
नद्यैपारं परापश्येदेवं स्वस्यायुषः पा[illegible]रं पराचख्यौ ॥६॥ सोऽर्चंछ्रा
म्यंश्चचार प्रजाकामः ॥ सऽआत्मन्येव प्रजातिमधत्त सऽआस्येनैव देवा
नसृजत ते देवा दिवमभिपद्यासृज्यंत तद्देवानां देवत्वं यद्दिवमभिप
॥५॥ द्यासृज्यंत तस्मै ससृजानाय दिवेवास तद्वेव देवानां देवत्वं यदस्मै सस
5 जानाय दिवेवास ॥७॥ अथ योऽयमवाङ्प्राणः ॥ तेनासुरानसृजत तऽइ ॥५॥
मामेव पृथिवीमभिपद्यासृज्यंत तस्मै ससृजानाय ॥८॥ तम इवास ॥ सोऽवेत् ॥ पाप्मानं
वाऽअसृक्षि यस्मै मे ससृजानाय तमऽइवाभूदिति तांस्ततऽएव पाप्म
नाविध्यत्ते ततऽएव पराभवंस्तस्मादाहुर्नैतदस्ति यद्दैवासुरं यदिदमन्वा
ख्याने त्वदुद्यतऽइतिहासे त्वत्ततो ह्येव तान्प्रजापतिः पाप्मनाविध्यत्ते त
तऽएव पराभवन्निति ॥९॥ तस्मादेतदृषिणाभ्यनूक्तं ॥ न त्वं युयुत्से कतम ५
च्चनाहर्न ते मित्रो मघवन्कश्चनास्ति ॥ मायेत्सा ते यानि युद्धान्याहुः

तमऽइवाभूद्

नौ घ शत्रुं न नु पुरा युयुत्स इति ॥१०॥ स यदास्मै देवांत्ससृजानाय ॥ दिवेवास
तदहरकुरुताथ यदस्मा असुरांत्ससृजानाय तम इवास तां रात्रिमकुरुत ते
अहोरात्रे ॥११॥ स ऐक्षत प्रजापतिः ॥ सर्वं वा अत्सारिषं य इमा देवता अ
सृक्षीति स सर्वत्सरोऽभवत्सर्वत्सरो ह वै नामैतद्यत्संवत्सर इति स यो ह
वा एतत्संवत्सरस्य संवत्सरत्वं वेद यो हैनं पाप्मा मायया त्सरति नाहैनं त्सा
रिलावत्यथ यमभिचरत्यभि हैवैनं भवति य एवमेतत्संवत्सरस्य सर्वत्सर
त्वं वेद ॥१२॥ स ऐक्षत प्रजापतिः ॥ इमं वा आत्मनः प्रतिमामसृक्षि यत्संवत्स
रमिति तस्मादाहुः प्रजापतिः संवत्सर इत्यात्मनो ह्येतं प्रतिमामसृजत यद्वेव
चतुरक्षरः संवत्सरश्चतुरक्षरः प्रजापतिस्तेनो हैवास्यैष प्रतिमा ॥१३॥
ता वा एताः ॥ प्रजापतेरधि देवता असृज्यन्ताग्निरिन्द्रः सोमः परमेष्ठी प्राजापत्यः ॥१४॥
ताः सहस्रायुषो जज्ञिरे ॥ ता यथा नद्यै पारं परापश्येदेवं स्वस्यायुषः पारं परा
चख्युः ॥१५॥ ता अर्चन्त्यः श्राम्यन्त्यश्चेरुः ॥ तत एतं परमेष्ठी प्राजापत्यो यज्ञम
पश्यद्यद्दर्शपूर्णमासौ ताभ्यामयजत ताभ्यामिष्ट्वाकामयताहमेवेदं सर्वं
स्यामिति स आपोऽभवदापो वा इदं सर्वं ता ह्यस्मिन्परमे स्थाने तिष्ठन्ति यो हीहाभि
खनेदप एवाभिविन्देत्परमाद्ध्या एतस्मात्स्थानाद्धि [illegible] दिवस्तस्मात्परमेष्ठी
नाम ॥१६॥ स परमेष्ठी प्रजापतिं पितरमब्रवीत् [illegible] कामप्रं वा अहं यज्ञमदर्शं

तनत्वा याजयानीति तथेति तमयाजयत्सऽइष्ट्वाकामयतेदमेवेदꣳसर्वꣳस्यामिति
स प्राणोऽभवत्प्राणो वाऽइदꣳसर्वमयं वै प्राणो योऽयं पवते स प्रजापतिस्तस्य दृष्टिर्य
देवावेदेत्थाद्धातीति यद्वैकिंच प्राणि स प्रजापतिः स यो हैवमेतां प्रजापतेर्दृष्टिं
वेदाविरिवहैव भवति॥७॥ स प्रजापतिरिंद्रं पुत्रमब्रवीत्॥ अनेन त्वा काम
प्रेण यज्ञेन याजयानि येन मामिदं [illegible]र मच्छ्रेयो यीयज्ञदिति [illegible]
तथेति तमयाजयत्सऽइष्ट्वाकामयतेदमिवेदꣳसर्वꣳस्यामिति स वागभवद्वाग्वाऽ
इदꣳसर्वं तस्मादाहुरिंद्रो वागिति॥८॥ अर्द्धप्रपाठकः॥५॥ सऽइंद्रोऽग्नीषोमौ भ्रातरा
वब्रवीत्॥ अनेन वां कामप्रेण यज्ञेन याजयानि येन मामिदं पिता प्रजापतिरयीय ॥६॥
६।
जदिति तथेति तावयाजयत्ताविष्ट्वाकामयेतामावमेवेदꣳसर्वꣳस्यावेति तयोर
न्नादऽएवान्यतरोऽभवदन्नमन्यतरोऽन्नादऽएवाग्निरभवदन्नꣳसोमोऽन्नादश्चवाऽ
इदꣳसर्वमन्नंच॥१३॥ ता वाऽएताः॥ पंच देवताऽएतेन कामप्रेण यज्ञेनायजंत तता
यत्कामाऽअयजंत सऽआभ्यः कामः समार्ध्यत यत्कामो ह वाऽएतेन यज्ञेन यजते
स हास्मिन्कामः समृध्यते॥२०॥ तऽइष्ट्वा प्राचीं दिशमपश्यन्॥ तां प्राचीमेवाकुर्वत
तस्मादिमाः प्रजाः प्राच्यः सर्पंति प्राचीꣳह्येतामकुर्वत तापेनामितः
स यं प्राच्यं वदिक्तस्मादिमां स्वल्पां पश्यसेति सा तसोद्धारन्नवत॥२१॥ अथ
कुर्वीमहीति तामूर्ध्वामकुर्वतेमां स्वल्प पश्यसेति
दक्षिणां दिशमपश्यन्॥ तां दक्षिणामेवाकुर्वत तस्मिन्यद्दक्षिणावदिक्तस्माद्दक्षिणत

एव दक्षिणत उपतिष्ठंत दक्षिणातो न्यवाजंति दक्षिणा ह्येतामकुर्वताप्येनामित:
कुर्वीमहीति तल्लोकमकुर्वत मं खलु लोकं पश्यामेति तदिदमंतरिक्षमन्तर्वा इदमावु
लोकः साध्या हे त्वयं प्रतिष्ठाविरस्मिंल्लोके पृथिव्येवमुहेव बाप्रतिष्ठाविरमुष्मिं
ल्लोक इदमंतरिक्षं स यद्धि हसं नमुं लोकं न पश्यति तस्मादाहुः पापहमसो
ल्लोक इति ॥२२॥ अथ प्रतीचीं दिशमपश्यन् ॥ तामाशामकुर्वत तस्माद्यस्या कश्च
त्वाशिं इत एतामेव प्रतन दिशमेत्याशा ह्येतामकुर्वताप्येनामित: कुर्वीमहीति
ता ह्ये श्रियमकुर्वत मां खलु श्रियं पश्येमेति स पृथिव्यां नवश्रीर्वा इयं तस्माद्यो
स्यां नु यिष्ठं विदतो स एव श्रेष्ठो भवति ॥२३॥ अथोदीचीं दिशमेव पश्यन् ॥ तासपा
म कुर्वतापेनामित: कुर्वीमहीति तं धर्ममकुर्वत धर्मो वा आपस्तस्माद्यो इदमेल्लोक
मापश्चागच्छंति सर्वमिवेदं यथाधर्मं भवत्यथ यदा वृष्टिर्भवति बलीया भवत
र्हे बली यस स आदत्त धर्मो ह्यापः ॥२४॥ ता वा एताः ॥ एकादश देवताः पंच प्र
याजा द्वावाज्यभागौ स्विष्टकृत्त्रयो नुयाजाः ॥२५॥ ता एकादशाहुतयः ॥ एताभि
र्वा आहुतिभिर्देवा इमांल्लोकानजयन्नेता दिशः स यथो ह वा एवं विद्वानेताभिराहुति
भिरिमांल्लोकांजयत्येता दिशः ॥२६॥ बत ह्यवान्तरदिशाः ॥ ता एव चत्वारः पत्नी
संयाजा अवान्तरदिशो विदद्वाश्चतुर्भिः पत्नीसंयाजैरजयन्नवान्तरदिशस्तथो
एवैष एतैर्जयति ॥२७॥ अथेडा ॥ अन्नाद्यमेवैतया देवा अजयंस्तथो
एवैष एतयान्नाद्यमेव जयत्यथ पानूदेवत्रायस्त्रिंश सर्वमासपो: संपत ॥२८॥

अष्टा१

अथाध्यात्मं॥ पंचमे पुरुषे प्राणाऽएतेव चतुर्थ्यां तऽएव पंच प्रयाजास्त चतुर्थीऽ आज्य
भागौ॥२९॥ अयमेवावाङ्प्राणः स्विष्टकृत्॥ स यत्तमन्त्यऽईऽइवेत रात्स्या आहु
तिभ्योजुहोति तस्मादेतस्मात्प्राणात्सर्वे प्राणा बीभत्सन्तेऽथ यत्स्विष्टकृते स
र्वेषाᳫं हविषाᳫं समवद्यति तस्माद्यत्किंचेमान्प्राणानापद्यतऽएवामतस्सर्वं
समवैति॥३०॥ त्रीणित्रिशाम्रानि॥ तऽएव त्रयोनुयाजाः सयोयं बर्हिष्ठोनुयाज
स्तदिदं वर्षिष्ठमिवत्रिशीर्ष्णं तवाऽअनवानं न्यजेदिसाहु स्तथा हास्यैतदमृत्वं
भवतीति॥३१॥ सावेसत्रदेवान्यानां॥ एकवᳫं शस्तस्य पर्वाथयदपर्वकᳫं
स्यास्तत्ततं विवर्तिष्ठेष्ठां बलवात्तस्माद्दतद्भवति षष्ठिपद्यतेच तस्मात्सकृ
८॥ दवान्यात्॥३२॥ द्वौबाहू द्वाऽऊरू॥ तऽएवचत्वारः पत्नीसंयाजाः प्रति ८॥
ष्ठा यमेव प्राणाऽइडा यत्तां नाग्नौ जुहोति यत्ह्याप्रद्गध्येव तस्माद्दयमन
वतस्सःप्राणः॥३३॥ अस्थन्वयाज्यानुवाक्या॥ मांᳫं सᳫं हवि सन्निमिते वै स्याय
याज्यानुवाक्यास्तस्माद्दु समावत्येवास्थीनि मेद्यतश्च कृश्यतश्च भवन्त्यथ
यद्भूयऽइव चहविर्गृह्णातिकनीयऽइवचतस्माद्दु माᳫं सान्येव मेद्यतो मेद्य
ति माᳫं सानि कृश्यतः कृश्यति तानेतानयष्टेनैयावान्मयपात दवतीतां
यजतियास्यहविर्भवति॥३४॥ तावापतेता॥ अथ षोडशर्ष्याद्उतथा भवति
सयाद्धैता सा मयाद्धार घायक मेगः श्लीतियास्याप्तेवानिर्हत्याद्दयंत

7

दृन्यान्यवरुन्धीळ्ंष्युपचाक्रियंत पचक्रियंत॥३प॥ ता वा एताः॥ षोडशाकृत
चोन्नवंति षोडशकलो वै पुरुषः पुरुषो यज्ञस्तस्मात्षोडशाकृतो भवति
॥३६॥ ब्राह्मणम्॥६॥ तद्वा उआदावुवाता पायनेउ उद्यात॥ यदि नाश्नाति पितृदे
वत्यो भवति यद्यु अश्नाति देवानत्यश्नातीति तदाहुरेणमश्नीयादिति तं त्रस्था
पयेति॥१॥ सयदि ग्राम्या ओषधीरश्नाति॥ पुरोडाशाख्यमेवमश्नाति यदु
द्यारण्या ओषधीरश्नाति बर्हिषामेधमश्नाति यदि वानस्पत्यमश्नाति इध्मस्यमे
धमश्नाति यदि पयः पिबति सान्नाय्यस्य चाज्यस्य चामेधमश्नाति यद्यपः पिबति
प्रणीतानां मेधमश्नाति यदि नाश्नाति पितृदेवत्यो भवति॥२॥ तदाहुः॥ किमय
नमिति स्वयं हैव तेरात्री अग्निहोत्रं जुहुयात्स यद्धु वा प्राश्नाति तेनो पितृ
देवत्यो भवति स्या हुतिर्वा एषा सयाद्देवतामात्मन्नाहुतिं हुतीति तेनो एतेषा
मेधानां नाश्नाति॥३॥ एतद्ध वै रात्री॥ सर्वा रात्रयः समवयंति या आपूर्यमा
ण पक्षस्य रात्रयस्ताः सर्वाः पौर्णमासीं समवयंति या अपक्षीयमाण प
क्षस्य रात्रयस्ताः सर्वा अमावास्यां समवयंति सयो हैवं विद्वांस्वयमुप
वसथ्ये जुहोति सर्वदा हैवास्य स्वयं हुतं भवति॥४॥ ब्राह्मणम्॥७॥ देवाश्च
वा असुराश्च॥ उभये प्राजापत्याः पस्पृधिरे ततो सुरा अतिमानेनैव कस्मि
न्नु वयं जुहुयामेति स्वेष्वेवास्येषु जुह्वतश्चेरुस्ते तिमानेनैव पराबभूवु

स्तस्मान्नातिमन्येत परान्वस्यसो हेतन्नु खलु वं यदतिमानः ॥१॥ अथ देवाः ॥ अ
न्यान्यस्मिन्नेव जुहुतश्चेरुस्तेभ्यः प्रजापतिरात्मानं प्रददौ यज्ञो हैषामा
स यज्ञो हि देवानामन्नं ॥२॥ स देवेभ्य आत्मानं प्रदाय ॥ अथैतमात्मनः
प्रतिमामसृजत यद्यज्ञं तस्मादाहुः प्रजापतिर्यज्ञ इत्यात्मनो ह्येतं प्रतिमा
मसृजत ॥३॥ स एतेन यज्ञेन ॥ देवेभ्य आत्मानं निरक्रीणीत तस्य हुत
मुपेति यथैव तत्प्रजापतिर्देवेभ्य आत्मानं प्रायच्छदेवमेवैष एतद्दे
वेभ्य आत्मानं प्रयच्छति तस्मादु संयत एवैतां रात्रिं चिचरिषेद्यथा हविरे
॥न॥ वं रदेवं हविर्भूर्षाद्देवानां भवति ॥४॥ अथ यद्यज्ञं तनुते ॥ यज्ञेनैव त
द्देवेभ्य आत्मानं निष्क्रीणीते यथैव तत्प्रजापतिर्निरक्रीणीतैवमथ ॥न॥
यद्धविर्निर्वपति हविर्भिर्वै तद्यज्ञं निष्क्रीणाति हविरनुवाक्ययानुवा
क्यामेवदानेनावदानं याज्यया याज्यां वषट्कारेण वषट्कारमाहुत्यात
स्याहुतिरेवानिष्क्रीता भवति ॥५॥ स यथाग्रं प्रक्षीणो सौ वृत्तेः ॥ एवमस्यैष
यज्ञो भवत्याहुतिमु वा अन्वाहार्येण निष्क्रीणाति तद्यदतद्धीनं यज्ञस्यान्वा
हरति तस्मादन्वाहार्यो नामैवमु हास्यैष सर्व एव यज्ञो निष्क्रीतो भवत्ये
ष हविर्यजमानस्यामुष्मिंल्लोक आत्मा भवति यद्यज्ञः स ह सर्वतनूर

ऽयजमानो मुष्मिंल्लोके संभवति य एवं विद्वान्निष्क्रीयायजते ॥६॥ ब्राह्मणम् ॥
त्रिर्ह वै पुरुषो जायते ॥ एतन्न्वेव मातुश्चाधि पितुश्चाग्रे जायतेऽथ यं यज्ञ ऽ
उपनमति स यद्यजते तद्द्वितीयं जायतेऽथ यत्र म्रियते यत्रैनमग्नावभ्या
दधति स यत्ततः संभवति तत्तृतीयं जायते तस्मात्त्रिः पुरुषो जायत इत्याहुः ॥१॥
तावद्वा एताः ॥ एकादश सामिधेनीरन्वाह दश वा इमे पुरुषे प्राणा आत्मैकादशो
यस्मिन्नेते प्राणाः प्रतिष्ठिता एतावान्वै पुरुषस्तदेनं कृत्स्नं जनयत्यथ यद्द्वादशीं
सामिधेनीन्यः सा प्रतिष्ठा तदेनं जनयित्वा प्रतिष्ठापयति ॥२॥ नव प्रसवस्य वा
हुतयः ॥ नव वै पुरुषे प्राणास्तदेनं द्वितीयं जनयत्याश्रावणे प्रत्याश्रावणं
सा प्रतिष्ठाथ यद्ध्वादः सृष्टो जन्मोद्यत तदेनं तृतीयं जनयति पत्नीसंयाजाः
एव तत्र प्रतिष्ठा ॥३॥ त्रिर्ह वै पुरुषो जायते ॥ एवमिमे नाम तद्यज्ञो त्रिर्जनयति
ता[illegible]स्त्यामेकादशानां त्रिः प्रथमामन्वाह त्रिरुत्तमां ॥४॥ ताः पंचदश सामिधेन्यः ॥
घावा घारौ पंच प्रयाजा इडा त्रयोनुयाजाः सूक्तवाकश्च शंयोर्वाकश्च तास्त्रयो
दशाहुतयोऽथ यद्ध्वादः पत्नीसंयाजेषु संप्रगृह्णाति समिद्यजुश्च ॥५॥ ताः
पंचदशाहुतयः ॥ तासां पंचदशानामेताऽनुवाक्या एताः पंचदश सामिधे
न्यऽ एतासामनुवाक्यानामेता याज्या य एवात्र मैत्रो यानि गद स्त्रैवयाज्यास्तूपम

तानाहास्यैतऽआहुतयोऽनुवाक्यवत्यो भवंत्यतान्त्रिः सामिधेनीं त्रिरेतान्त्रिराहुति
त्रिरेतऽअनुवाक्या याज्यवत्यश्चाहुतिमत्यश्च भवंति ॥ ६ ॥ ब्राह्मणम् ॥ ९ ॥ गायत्री
मनुवाक्यामन्वाह ॥ त्रिपदा वै गायत्री त्रयऽइमे लोकाऽइमानेवैतल्लोकान्देवाः
प्रत्यष्ठापयन्नेव अथ त्रिष्टुभा यजति ॥ चतुष्पदा वै त्रिष्टुप्चतुष्पादाः पशवस्तत्पशू
न्वेतदेषु लोकेषु प्रतिष्ठितेषु देवाः प्रत्यष्ठापयन् ॥ २ ॥ अथ द्वाराघषट्कारः ॥ द्वि
पाद्वै पुरुषः पुरुषस्तत्पुरुषमेवैतद्द्विपादमेषु पशुषु प्रतिष्ठितेषु देवाः प्रत्यष्ठापयन् ॥ ३ ॥
सोऽयं द्विपात्पुरुषः पशुषु प्रतिष्ठितऽएवमेवैषऽएतांल्लोकान्प्रतिष्ठापयति लोके
६ ॥ षु प्रतिष्ठितेषु पशून्प्रतिष्ठापयति पशुषु प्रतिष्ठितेष्वात्मानं प्रतिष्ठापयत्येवमेष
पुरुषः पशुषु प्रतिष्ठितो यऽएवं विद्वान्यजते ॥ ४ ॥ अथ यद्वषट्कृत्य जुहोति ॥ पद्धि ॥
एष वै वषट्कारो यऽएष तपति सऽएष मृत्युस्तदेनमुपरिष्टान्मृत्योः संस्कारा
तितादेनममृतात्जनयति सऽएतं मृत्युमतिमुच्यते पशवो वाऽअस्यात्मा भवति
तद्यदुऽएवं न्नाल्वितं मृत्युमतिमुच्यतऽएतेनाहास्य सार्वयज्ञक्रतवऽएतं मृ
त्युमतिमुक्ताः ॥ ५ ॥ अथ यामेतामाहुतिं जुहोति ॥ एषा हवाऽअस्याहुतिर
मुष्मिंल्लोकऽआत्मा भवति स यदेवंविदस्माल्लोकात्प्रैत्यथैनामाहुतिस्तस्य
पृष्ठतः सत्या ह्वयत्येह्येहीत्यहं वै तऽइहात्मास्मीति तद्यदाह्वयति तस्मादाहुतिर्नाम ॥ ६ ॥
॥ ब्राह्मणम् ॥ १० ॥ ब्रह्म वाऽइदमग्रऽआसीत् ॥ तद्देवानसृजत तद्देवान्त्सृष्ट्वैषु

लोकेषु व्यारोहयदस्मिन्नेव लोके ऽग्निं वायुमंतरिक्षे दिव्येव सूर्यम्॥१॥ अथ ये
तऽ ऊर्ध्वा लोकाः॥ तद्याऽ अतऽ ऊर्ध्वा देवतास्तेषु ता देवता व्यारोहयत्स यथा है
वेमऽ आविर्लोकाऽ इमाश्च देवताऽ एवमु हैव तऽ आविर्लोकाश्च इ देवता ये
षु ता देवता व्यारोहयत्॥२॥ अथ ब्रह्मैव परार्धमगच्छत्॥ तत्परार्धं गत्वैक्षत
कथन्न्विमां लोकान्प्रत्यवेयामिति तद्द्वाभ्यामेव प्रत्यवैद्रूपेण चैव नाम्ना च स यस्य
कस्य च नामास्ति तन्नाम यस्योऽ अपि नाम नास्ति यद्वेद रूपेणेदं रूपमिति
तद्रूपमेतावद्वाऽ इदं यावद्रूपं चैव नाम च॥३॥ ते हैते ब्रह्मणो महतीऽ अभ्वे॥
स यो हैते ब्रह्मणो महतीऽ अभ्वे वेद महद्धैवाभ्वं भवति॥४॥ ते हैते ब्रह्मणो
महती यक्षे॥ स यो हैते ब्रह्मणो महती यक्षे वेद महद्धैव यक्षं भवति तयोर
न्यतरज्ज्यायो रूपमेव यद्ध्यपि नाम रूपमेव तद्यो हैतयोर्ज्यायो वेद
ज्यायान्ह तस्माद्भवति यस्माज्ज्यायान्बुभूषति॥५॥ मर्त्या ह वाऽ अग्रे देवाऽ आसुः॥
स यदैव ते ब्रह्मणापुरथामृताऽ आसुः स यं मनसाऽ आघारयति मनो वै
रूपं मनसा हि वेदेदं रूपमिति तेन रूपमाप्नोत्यथ यं वाचाऽ आघारयति
वाग्वै नाम वाचा हि नाम गृह्णाति तेन नामाप्नोत्येतावद्वाऽ इदं सर्वं या
वद्रूपं चैव नाम च तत्सर्वमाप्नोति सर्वं वाऽ अक्षय्यमेतेनास्याक्षय्यं सुकृतं
भवत्यक्षय्यो लोकः॥६॥ तद्धाऽ अद्देषाऽऽग्नेयामिद्धाऽउपयते॥ अथातो द्वैधे

८१२

यज्ञः प्रारोचत तं यथा त्वत तद्यज्ञं तन्वाना न्वबीनां गंधर्वाउ प निषेदु स्तेत स्मसं
१० निदधतीदं वाऽअत्यरीरिचन्निदमूनमकर्मेति स यदूर्षा यज्ञः संतस्थे तेना
स्वद्दर्शीयाचक्रु रिदं वाऽअत्यरीरिचे तदूनमकर्मेति ॥७॥ स यदति स्वयां
चक्रुः॥ यथाग्निरिर्वे तदासाथ यद्द्दूनं चक्रुर्यथाग्निपत्राः प्रदद्याऽएवं तदास॥८॥
स यत्र ग्नायारह॥ तदुपि मृशाति यज्ञनमस्पृतऽउपस्व यज्ञस्य त्रिवे संतिष्ठ
स्व स्विष्टेमे संतिष्ठस्वेति स यदति त्वयति तं नु सस्कारेण शमयत्यथ यदूनं
करोत्युपस्वतीतन्तदन्यूनं भवति यज्ञस्य शिवे संतिष्ठस्वेति यद्वै यज्ञस्यान्यू
११०१ नातिरिक्तं तच्छिवं तनुतदुनेयं शमयति स्विष्टमे संतिष्ठस्वेति यद्वै यज्ञस्या ११०१
न्यून नातिरिक्तं तत्स्विष्टं तनुतदुनयं शमयत्येवमुहास्येतेन यज्ञेनान्यू
नातिरिक्तेन त्वष्टं भवति यऽएवं विद्वानेवमभि मृशति तस्माद्वेवमेवाभि
मृशेत्तेहात मांधर्वाऽआसुः स्मर्पयवमानं पि रुद्धा नु त्वां धा नीतु वा नीतु॥९॥
॥ब्राह्मणम्॥११॥ एषा वै दर्शमासाः॥ यऽएषतपत्यह रहरेव विषणो यि यऽएव
दर्शोयि बुद्ध्रू माददृ श्राइ वत्ये षः॥१॥ अथो ऽइतरथोऽहु॥ एष वाऽएव दह
तो मा यद्वै द्रूमाऽएतं ददृहानु मराण्योर्णमासी त्याय चन्द्रो ति प्येष ऽएव द्वौ

यऽएष तपति दृश्यतऽइव ह्येषः ॥ आदित्य एव पूर्णमाः ॥ पूर्णेव हीयमसावेव द्यौर्द
र्शो दृश्यऽइव ह्यसौ द्यौः ॥३॥ रात्रिरेव पूर्णमाः ॥ पूर्णेव हीयं रात्रिरहरेव
दर्शो दृश्यऽइव हीदमहस्तदेतावनुदेवत्रा दर्शपूर्णमासावाख्यायामीमाऽसा ॥४॥
अथाध्यात्मं ॥ उदानऽएव पूर्णमाः ॥ उदानेन ह्ययं पुरुषः पूर्यतऽइव प्राणऽएव
दर्शो दृश्यऽइव ह्ययं प्राणस्तदेतावन्नादश्चान्नप्रदश्च दर्शपूर्णमासौ ॥५॥
प्राणऽएवान्नादः ॥ प्राणेन हीदमन्नमद्यतऽउदानऽएवान्नप्रदऽउदानेन ही
दमन्नं प्रदीयते स यो हैतावन्नादं चान्नप्रदं च दर्शपूर्णमासौ वेदान्नादो है
वन्नवति प्र हास्माऽअन्नाद्यं दीयते ॥६॥ मनऽएव पूर्णमाः ॥ पूर्णमिव हीदं मनो वा
ग्वेव दर्शो दृश्यऽइव हीयं वाक्तदेतावध्यात्मं प्रत्यक्षौ दर्शपूर्णमासौ स यऽउप
वसथे व्रतोपायनीयमश्नाति तेनैतावध्यात्मं प्रत्यक्षौ दर्शपूर्णमासौ प्रीणाति य
द्धेन प्रातर्हविषा ॥७॥ तदाहुः ॥ यन्न पूर्णमासायायति हविर्गृहीतेन दर्शायेति हवि
र्गृहीतेन न पूर्णमासायानुब्रूहि न दर्शायानुब्रूहि न पूर्णमासौ यजेति न दर्शायेति यज
त्यथ कतमास्य दर्शपूर्णमासौ विज्ञायेतेऽइति स यं मनसा ध्यायति तमि
नाति पूर्णमासौ न पूर्णमासं यजत्यथ यदनाधानं ध्यायत्येव दर्शपूर्णमासौ स्ति नो दर्शाय
जत्यतनाहास्य दर्शपूर्णमासौ विच्छिद्येते ॥ ८ ॥ त हि ... विति वि

पौर्णमास्यां स रक्षते मावास्यायां स रक्षस्व स्याऽएत ... दर्शपूर्णमासौ
यजामहऽइति यद्वदंतस्तदु तथा न कुर्यान्मनो विश्वरस्वान्चाक्नु रक्षतीस यदीवेता
वाघारावाघारयति तद्दर्शपूर्णमासावि भ्रोन्भवतस्तस्मादेतावद्भूनानि
र्वपेत्॥२॥तदाहुः॥आग्रयणीवाऽएष न्नवति यां दर्शपूर्णमासाभ्यां यजते पौर्ण
मासेन हीष्ट्वा इन्द्रमावास्येन यजन्त्यऽइत्यामावास्येनेष्ट्वा ह्येव पुनः पौर्ण
मासेन यजन्त्यऽइति सऽआग्रयणीवाऽमुंल्लोकामति यदामुं लोकमेति कथमना
ग्रयणी भवतीति स यदादावेताऽउभयत्राघारावाघारयति तद्दर्श
॥११॥ पूर्णमासौ संतिष्ठेते सस्मेऽन्ति ताभ्यां दर्शपूर्णमासाभ्यां रथा मुंल्लोक ॥२१॥
मेति तथा नाग्रयणी भवति॥१०॥ब्राह्मणम्॥२॥प्रथमः प्रपाठकः समाप्तः कण्डिका २२॥
॥ अपिहवाऽएतर्हि॥ देवत्र्याश्वमेधमालम्भेत तदाहुः प्राकृताश्वमेधऽइतीतरऽ
इन्द्रनं सतद्वाऽएषऽएवाश्वमेधो यद्यज्ञः इमाः॥१॥ तदाहुः॥ पदं पदं श्वस्य
मेध्यस्याहुतिं जुहोतीति स यत्सायं प्रातरग्निहोत्रं जुहोति द्विः सायमाहुती
जुहोति द्विः प्रातस्ता श्चतस्रऽआहुतयश्चतुष्पाद्वाऽअश्वस्तदस्य पदे पदे
एवाहुतिर्हुता भवति॥२॥तदाहुः॥ चित्यत्वश्चत्यस्यापि न्निचे पंतीत्य षवे साम
राजा देवानाम न्नं यज्ञ इमाः स यत्त्रिवाऽएतां रात्रिं नद्धरस्नान्नपश्वाद्दहरी

तदिमं लोकऽ आगच्छति सोऽस्मिंलोके विवर्त्तते ॥३॥ स यदामावास्येन यजते । विद्युत्ऽ
एवास्य तद्दिक्षु ष्टिं निर्वपति यथ यस्योत्स मासे नजत तमश्वमेध मिदत दालभन्ते
तमालभ्य दक्षिणत्यः प्रयच्छति संवत्सर एवाऽइ तरमश्वमेध मालभन्ते तऽ एवं मासः
परिप्लवमानः संवत्सरं करोति तदस्य संवत्सरं संवत्सरऽ एवाश्वमेधऽ आलब्धो भ
वति ॥४॥ तं वाऽ एतं ॥ मासि मास्यं वाश्वमेधमालभन्ते तस्माया हवं विद्वानग्निहोत्रं
जुहोति दर्शपूर्णमासाभ्यां यजते मासि मासि हवा स्याश्वमेधेने ष्टं भवत्येतदु
हास्याग्निहोत्रं च दर्शपूर्णमासौ चाश्वमेधमभिसंपद्येते ॥५॥ ब्राह्मणम् ॥१॥
शिरो ह वाऽ एतद्यज्ञस्य यत्प्रणीताः ॥ स यत्प्रणीताः प्रणयति शिरऽ एवैतद्यज्ञस्य
संस्करोति स विद्याच्छिरऽ एव मऽ एतत्संस्क्रियतऽ इति ॥१॥ प्राणऽ एवास्य ध्मः ॥
प्राणेन हीदं सर्वमिद्धं यस्मात्प्राणन्निमिषदेजति स विद्यादह मेवाऽ एषऽ इध्मऽ
इति ॥२॥ अनूकमेवास्य सामिधेन्यः ॥ तस्मात्ता ब्रूयात्संतत्यन्निवमेनु ब्रूहीति
संततमिव हीदमनूकं मनाश्चैवास्य वाक्चाघारौ सरस्वांश्च सरस्वती चाघि
घारौ मनश्चैव मे वाक्चाघारौ सरस्वांश्च सरस्वती चेति ॥३॥ पंच प्रयाजाः ॥ इ
मऽ एवास्यात शीर्षण्याः पंच प्राणास्तानेवास्य प्रथमः प्रयाजो दक्षिणा नासिका
द्वितीयः सव्या नासिका तृतीयो दक्षिणः कर्णश्चतुर्थः सव्यः कर्णः पंचमोऽथ य
च्चतुर्थे प्रयाजे समानयति तस्मादिदं श्रोत्रमन्तरतः संविचस्तुभीऽ आज्ये
॥

प्र० ४ २

नागौ सुघियाच्छस्रुचौ एवमेतद्रताविति॥४॥ अथ यदाग्नेयः पुरोडाशः॥ अयमे
वास्य स दक्षिणोऽर्द्धो हृदयमेवास्योपांशुयाजः स यत्तेनोपांशु चरति तस्मा
दिदं गुह्यवहृदयं॥५॥ अथ योऽग्नीषोमीयः पुरोडाशः॥ अयमेवास्य सऽ
न्नागार्द्धऽऐंद्रवायवाग्रानाग्रमंतराऽ स मेवास्य स्विष्टकृद्विषं प्राशित्रं॥६॥
स यत्प्राशित्रमवद्यति॥ यथैव तत्प्रजापतेराविद्धं निरकृंतन्नेवमेवैतस्येत
द्यद्धविष्टितं यद्गुथितं यद्दरुण्यं तन्निष्कृंतंति सुघियाद्यथैव तत्प्रजापतेराविद्धं
वमे निरकृंतन्नेवमऽऽदं यद्धविष्टितं यद्गुथितं यद्दरुण्यं तन्निष्कृंततीति॥७॥ उदर
मेवास्य इडा॥ तद्यथैवादऽइडायाः समवद्यत्युदरमेव तद्दधि विश्वरूपमन्नमुदरा॥८॥
॥१२॥ रे समवधीयते॥९॥ त्रयाऽनुयाजाः॥ इमऽएवास्य ते वांच स्त्रयः प्राणा बाहू
एवास्य स्रुक्तवाकश्च शंयोर्वाकश्च चत्वारः पत्नीसंयाजा अवतस्थावप्रतिष्ठा
ऊरू अष्ठीवंतौ द्वौ पादावेवास्य समिष्टयजुः॥१०॥ ताऽएकविंशतिः
१२ राकृतयः॥ द्वावाघारौ पंच प्रयाजा द्वावाज्यभागौ आग्नेयः पुरोडाशस्तद्दश
ग्नीषोमीयऽउपांशुयाजोऽग्नीषोमीयः पुरोडाशोऽग्निः स्विष्टकृदिडा त्रयो
नुयाजाः स्रुक्तवाकश्च शंयोर्वाकश्च यद्वादः पत्नीसंयाजेषु संचर्यं
ति समिष्टयजुः॥११॥ ताऽएकविंशतिराकृतयः॥ द्वादश मासा॥ पंचर्त्तवस्त्रयो लोकास्तद्विंशतिरेषऽएवैकविंशो यऽएष
रस्य पंचर्त्तवस्त्रयो लोका

तत्प्रतिसेषा गतिरेषा प्रतिष्ठा तामेतां गतिमेतां प्रतिष्ठां गच्छति ॥११॥ तद्धस्मैतदारुणिराह ॥
अर्द्धमासशो वा अहममुनादित्येन सलोकान्नेवामि तामहं दर्शपूर्णमासयोः
संपदं वेदेति ॥१२॥ तदाहुः ॥ आत्मयाजी श्रेयां३ देवयाजी३ इत्यात्मयाजीति
ह ब्रूयात्स ह वा आत्मयाजी यो वेदेदं मेनेनाङ्गं संस्क्रियत इदं मेनेनां
गमुपधीयत इति स यथाहिस्त्वचो निर्मुच्यत एवमस्मान्मर्त्याच्छरीरात्पाप्म
ना निर्मुच्यते स ऋङ्मयो यजुर्मयः साममय आहुतिमयः स्वर्गं लोकमभि
संभवति ॥१३॥ अथ ह स देवयाजी यो वेद ॥ देवानेवाहमिदं यजे देवांत्सप
र्यामीति स यथा श्रेयसे पापीयान्बलिं हरेद्वैश्यो वा राज्ञे बलिं हरेदेवं
स स ह न तावन्तं लोकं जयति यावन्तमितरः ॥१४॥ ब्राह्मणम् ॥२॥ संवत्सरो यज्ञः ॥
स यो ह वै संवत्सरो यज्ञ इति विद्यान्त ह वास्य संवत्सरस्यैकेनैव याथायत्किं
च संवत्सरे क्रियते सर्वं हैवास्य तदाप्तमवरुद्धमभिजितं भवति ॥१॥ ऋतवः
ऋत्विजः ॥ स यो ह वा ऋतव ऋत्विज इति विद्यान्त हैवास्य ऋतूनामिष्टेनैवर्त्य
त्या यत्किंचर्तुषु क्रियते सर्वं हैवास्य तदाप्तमवरुद्धमभिजितं भवति ॥२॥
मासा हवींषि ॥ स यो ह वै मासा हवींषीति विद्यान्त हैवास्य मासामिष्टेनैवस्य
त्या यत्किंच मासेषु क्रियते सर्वं हैवास्य तदाप्तमवरुद्धमभिजितं भवति ॥३॥
अर्द्धमासा हविष्पात्राणि ॥ स यो ह [illegible] हविष्पात्राणीति [illegible]

हैवास्यां ऽर्द्धमासानामिष्टं भवत्यथो यत्किंचार्द्धमासेषु क्रियते सर्वं हैवास्य तदाप्त
मुवरुद्धमभिजितं भवति ॥४॥ अहोरात्रे परिवेष्टौ ॥ स यो ह वा ऽअहोरात्रे परिवे
ष्टौ ऽइति विद्वांत हैवास्याहोरात्रयोरिष्टं भवत्यथो यत्किंचाहोरात्रयोः क्रियते
सर्वं हैवास्य तदाप्तमवरुद्धमभिजितं भवति ॥५॥ इयमेव प्रथमा सामिधेनी ॥
अग्निर्द्वितीया वायुस्तृतीयांतरिक्षं चतुर्थी द्यौः पंचम्यादित्यः षष्ठी चन्द्रमाः सप्त
मी मनोऽष्टमी वाङ्नवमी तपो दशमी ब्रह्मैकादश्येता हि वाऽइदं सर्वं समिंधते
एताभिरिदं सर्वं समिद्धं तस्मात्सामिधेन्यो नाम ॥६॥ सावित्रीं प्रथमामन्वाह ॥
॥१३॥ स यत्प्रथमामन्वाह प्राचीं तेन दिशं जयति यद्द्वितीयं दक्षिणां तेन दिशं जयति ॥१३॥
यत्तृतीयमूर्ध्वामेव तेन दिशं जयति ॥७॥ त्रिरेवोत्तमामन्वाह ॥ स यत्प्रथम
मन्वाह प्रतीचीं तेन दिशं जयति यद्द्वितीयमुदीचीं तेन दिशं जयति यत्तृतीय
13 मिमामेव तेन प्रतिष्ठां जयत्यथ यमुत्तममिमांल्लोकाञ्जयत्येता दिशः ॥८॥ एतद्व
मेव सर्वं ऽआप्यायः ॥ स त्यमुत्तमा ह वा ऽऋतं सत्यं यथो यत्किंचर्तं सत्य
च्यां जय्यं सर्वं हैवृत जयति ॥९॥ त्रिविदेव प्रथमः प्रयाजः ॥ अपचि
तिर्द्वितीयो यशस्तृतीयो ब्रह्मवर्चसं चतुर्थोन्नाद्यं पंचमः ॥१०॥ स प्रथमं
प्रयाजमनुमंत्रयते ॥ त्रिविमान्नया समित्यपचितिमान्नया समिति
द्वितीयं यशस्वीन्नया समिति तृतीयं ब्रह्मवर्चसान्नया समिति चतुर्थमन्ना

स्तान्नूयासमिति पंचमं स्विष्टिमान्नवाज्य अपवितिमान्य ह्यास्त्री ब्रह्मवर्चस्यन्ना
न्नवतिष्ठ एवाम तत्स्वद॥ ॥ एतद्ध स्म वै तद्विद्वानाह॥ श्वेतकेतुरारुणेयः कु दो
ँ स्विद्देवापरीषु महत्वा गमिष्यामि सं सारं दिदृक्षिता तत्र एवमेतस्य
याजानोपक्षो विदितेति॥१२॥ न्नुतामवत्सुर्के आज्यभागः॥ न विष्णवे तारावह
विन्नतं चन्नविष्यच्च रुघेथो यत्किंच न्नूतन चन्नविष्यतां च जयत्संसर्वं हि वत
न्नुयति॥१३॥ ब्रह्माग्नेयः पुरोडाशः॥ स यो हैवं ब्रह्माग्नेयः पुरोडाश इति सो
घ्नवह ब्रह्म रुघेथो यत्किंच ब्रह्मणा जयत्सर्वं हि तन्नुयति॥१४॥ क्षत्रमुपांशु
यजे॥ स यो हैव क्षत्रमुपांशुयाज इति विद्वा वह क्षत्रं रुघेथो यत्किंच
क्षत्रेणाजयत्सर्वं हि व तन्नुयति तद्यदुपांशुयजे कुर्वन्त्ये के न केतस्मा
दु क्षिप्रोपांशु च क्षत्रायाचक्षते॥१५॥ विडुत्तरः पुरोडाशः॥ स यो हैव
विडुत्तरः पुरोडाश इति विद्वा वह विशं रुघेथो यत्किंच विशा जयत्स
र्वं हि व तन्नुयति तद्यद्दाग्नेयुक्ष्म पुरोडाशः उपांशुयाजमध्य एषाविनवत
स्तस्माद्विन्न ब्रह्म च क्षत्रं च विशि प्रतिष्ठिता॥१६॥ राष्ट्रं सान्नाय्यं॥ स यो हा
व राष्ट्रं सान्नाय्यमिति विद्वावह राष्ट्रं रुघेथो यत्किंच राष्ट्रेणाजयत्सर्वं
हि व तन्नुयति तद्यत्सन्नयत्येकेतस्माद्राष्ट्रं संचिति कुर्वन्ता॥१७॥ तत्पः क्षिप्र

कृतं ॥ स यो ह वै तपः स्विष्टकृदिति वेद ह्यावहतपो रुंधेथो यत्किंच तपसा जय्यं
सर्वं हैव तज्जयति ॥ १०॥ लोकः प्राशित्रं ॥ स यो ह वै लोकः प्राशित्रमिति वे
दावहं लोकं रुंधेथो यत्किंच लोके न जय्यं सर्वं हैव तज्जयति नाह लो
वन लोका छ्यवते नो ह वा अमुष्मिं लोकाल्लोका छ्यवते यएवं
एवं वेद न ह बहु च न पापं कृत्वा लोका छ्यवते ॥११॥ श्रद्धेडा ॥ स यो ह वै
श्रद्धेडेति वेद ह्यावहं श्रद्धां रुंधेथो यत्किंच श्रद्धया जय्यं सर्वं हैव तज्जयति ॥१२॥
अथातो निरवग्रथमोऽनुयाजः ॥ कद्दु निर्द्वितीयः उल्कुषीत्तृतीयः ॥१॥ स प्रथम
॥१४॥ मनुयाजमनुमंत्रयते ॥ अग्नान्यमुं जहीति यं द्विष्याद्धा उं न्यमुं जहीतिद्वि
तीयमुल्कुष्यमुं जहीति तृतीयं ॥२॥ स यद एव बहिर्द्विषन्निषयात ॥ अग्ना निहत मनुया ॥१५॥
जो हैं स्पृथ वा विस्रव निश्र इद कद्दु निहत मनुयाजो हे स्पृथ वा स्पृष्टमिश्र
इ वोल्कुषी हत मनुयाजो हैति ॥३॥ ससा यज्ञामनिः ॥ एत या वै मन्या देवा
असुरान्वराना वयांचक्रुस्तथोऽएवैवंवि यजमानः पाप्मानं द्विषंतं भ्रा
तृव्यं पराण्नावयति ॥४॥ सपद नुयाजा ताता यज्ञः स्यात ॥ अग्नान्यतः स्याधा
नृच्यतउल्कुष्यंतस्तस्माद्धि देवानां यज्ञ इडांताविवज्ञो यंते तावा ॥५॥
प्रयाजैर्वै देवाः ॥ स्वर्गं लोकमायं स्तानसुराऽअन्वाजिगांसं स्तानन्नु

याजैः प्रत्यौहंस्तद्यदनुयाजैर्यजति पाप्मानमेव तद्द्विषन्तं भ्रातृव्यं यजमानः
प्रत्यूहति ॥२६॥ प्राणा वै प्रयाजाः । अपानोऽनुयाजास्तस्मात्प्रयाजाः प्रा
ञ्चो हूयन्ते तद्धि प्राणरूपं प्रत्यञ्चोऽनुयाजास्तदपानरूपमेता ह वै द्वादशसिस्
मा स यो या रूपं स ला यदनुयाजास्तस्मात्त उपसद्य पिता प्रत्यञ्चो हूयन्ते ॥२७॥
स उ स्तास्तत्सूक्तवाकः ॥ स यो ह वै संस्था सूक्तवाक इति वेद वह संस्थाꣳ
हन्धेथो यत्किं च संस्था याजयत्यꣳ सर्वꣳ हैव तत्सं यति गच्छति य एवꣳ स
संस्थां ॥२८॥ प्रतिष्ठा शंयोर्वाकः ॥ स यो ह वै प्रतिष्ठा शंयोर्वाक इति वेद
वह प्रतिष्ठाꣳ हन्धेथो यत्किं च प्रतिष्ठ याजयत्यꣳ सर्वꣳ हैव तत्प्र यति गच्छति
प्रतिष्ठां ॥२९॥ ता देवाः ॥ एतान्पत्नीसंयाजान्यश्चात्पाली हैत्त मिथुनमे
व तदुपरिष्टाद्दधत प्रजात्यै तद्यत्पत्नीसंयाजैर्यजति मिथुनमे
व तदुपरिष्टाद्धत्ते प्रजात्यै देवानां हैव प्रजातिमनु प्रजायते मिथु
नेन मिथुनेन ह प्रजायते य एवमेतद्वेद ॥३०॥ अन्नꣳ समिष्टयजुः ॥
स यो ह वा अन्नꣳ समिष्टयजुरिति वेद वहान्नꣳ हन्धेथो यत्किं चान्नं जयत्यꣳ
सर्वꣳ हैव तन्नयति ॥३१॥ संवत्सरो यजमानः ॥ तमेतद्वा याजयति वसन्त
आग्नीध्रस्तस्माद्वसन्ते दावाग्नयः सं तितत्य अग्नि रूपं ग्रीष्मोऽध्वर्युः स ह इवाव

ग्रीष्मम्मध्यमिवाध्यर्युर्निक्रामति वर्षाऽउ हातात तस्माद्यदा बलवद्वर्षति साम्राः
ड्डावा पृष्टिः क्रियतेऽथा रजुह्वानात तस्माद्यदा सस्यं पच्यते ब्रह्मण्वयः प्रजाऽइ
स्यादुहिमन्तो हा तात तस्मादुहेमन्वेषधयः कृताः पन्नावः सीदान्त्य ताहवाऽएनं देवता
15 याजयन्ति स यद्येनमेषा वीरा याजयेयुरितऽएव देवतामनसो ध्यायेदेता हि
त्वेनं देवता याजयन्ति ॥३२॥ अथातो हविषुः तुला ॥ यद्दक्षिणो वेद्यं तः स यत्सो
धुकरोति तद्दक्षिणं यद्य साधु तद्वाहि वेदि तस्माद्दक्षिणो वेद्यन्तमधिस
॥२५॥ स्पृवासीत तुलायांऽह वाऽअमुष्मिंल्लोकऽआदधति यतरद्यंस्य ॥१७॥
ति तदन्वेष्यति यदि साधु वा साधु वेत्यथ यऽएवं वेदास्मिन्हैव लोके तुलामा
रोहत्यमुष्मिंल्लोके तुलाधानं मुच्यते साधु कृत्या हैवास्य वर्द्धते न पाप
कृत्या ॥३३॥ ब्राह्मणम् ॥३॥ अं प्रपाठकः ॥५॥ ॥ अध्यायः ॥ यो ह वा एतस्याग्नि
होत्रस्याग्निहोत्री ॥ मनऽएव वत्सस्तदिदं मनश्च वाक् च समानमेव सन्ना
नेव तस्मात्समान्या रज्ज्वा वत्सं च मातरं चाभिदधति तेजऽएव श्रद्धा सत्य
माज्यं ॥१॥ तद्धैतज्जनको वैदेहः ॥ याज्ञवल्क्यं पप्रच्छ वेत्थाग्निहोत्रं याज्ञवल्क्या३
इति वेद सम्राडिति किमिति पयऽएवेति ॥२॥ यत्पयो न स्यात्केन जुहुयाऽ
इति व्रीहियवाभ्यामिति यद्व्रीहियवौ न स्यातां केन जुहुयाऽ इति याऽअन्याऽ

मुनटुवेदृदाहमनसेवास्यार

ॐषधऽऽ इति यदन्याऽऽ ओषधयो न स्युः केन जुहुयाऽऽ इति याऽऽ आरण्याऽऽ ओषधय इति
यदारण्याऽऽ ओषधयो न स्युः केन जुहुयाऽऽ इति वानस्पत्येनेति यद्वानस्पत्यं
न स्यात्केन जुहुयाऽऽ इत्यद्भिरिति यदापो न स्युः केन जुहुयाऽऽ इति ॥२॥
स होवाच ॥ न वाऽऽ इह तर्हि किंचनासीदथैतदहूयतैव सत्यं श्रद्धायामि
ति वेत्थाग्निहोत्रं याज्ञवल्क्य धेनुशतं ददामीति होवाच ॥४॥ तदप्येते श्लोकाः ॥
किं स्विद्विद्वान्प्रवसत्यग्निहोत्री गृहेभ्यः कथं स्विदस्य काव्यं कथं संत
ताऽ अग्निभिरिति कथं स्विदस्यानपप्रोषितं भवतीत्येवैतदाह ॥५॥ यजवि
ष्ठा सुवनेषु ॥ स विद्वान्प्रवसन्विदेतथा तदस्य काव्यं तथा संततोऽ अग्निभिरिति
[redacted] न पक्षप्रोषितं भवती [redacted]
न्प्रवसन्विद ॥ तथा त्वदस्य काव्यं तथा संततऽ अग्निभिरिति मनऽ एवैतदाहम
न सिवास्या [redacted] ॥६॥ यत्सदूरपारत्य ॥ अथ तत्र प्रमाद्येत ॥
कस्मिन्नस्य हुतं हुतमिति गरुपामस्य जुह्वतीति यत्स दूरंपारं स्याथ तत्र प्रमा
द्येत कस्मिन्नस्य सोऽहुतमिति हुतान्भवतीत्येवैतदाह ॥७॥ योजागार भुवनेषु ॥ वि
श्वाजातानि यो बिभर्ति ॥ तस्मिंस्मास्य हुतं हुतमिति गरुपामस्य जुह्वतीति प्राणमे
वैतदाह तस्मादाहुः प्राणऽ एवाग्निहोत्रमिति ॥८॥ ब्राह्मणम् ॥७॥ याज्ञवा
अग्निहोत्रं ॥ यन्मिथुनान्निर्वदन्मिथुने न मिथुने न ह प्रजायते सर्वोऽपि

प्रजातिर्यजमानश्च पत्नी च तदेकं मिथुनं तस्माद्यस्य पत्नी वदग्निहोत्रं
स्यादेतन्मिथुनमुपाप्नवानीति वत्सश्चाग्निहोत्री च तदेकं मिथुनं तस्माद्यस्य
पुंवत्साग्निहोत्री स्यादेतन्मिथुनमुपाप्नवानीति स्थाली चाङ्गाराश्च तदेकं
मिथुनं स्रुक् च स्रुवश्च तदेकं मिथुनमाहवनीयश्च समिच्च तदेकं मिथुनमा
हुतिश्च स्वाहाकारश्च तदेकं मिथुनमेतानि ह वा ऽअग्निहोत्रे षण्मिथुनानि
तानि य ऽएवं विद्वान्मिथुनेन मिथुनेन प्रजायते सर्वाभिः प्रजातिभिः ॥१॥ ब्रा० ॥५॥
ब्रह्म वै मृत्यवे प्रजाः प्रायच्छत्तस्मिन्ब्रह्मचारिणमेव न प्रायच्छत्सोऽब्रवीद
स्तु मह्यमप्येतस्मिन्भाग ऽइति यामेव रात्रिं समिधं नाहरातै ऽइति तस्मा
द्यां रात्रिं ब्रह्मचारी समिधं नाहरत्यायुष ऽएव तामवदाय वसति तस्मा
द्ब्रह्मचारी समिधमाहरेन्नेदायुषोऽवदाय वसानीति ॥१॥ दीर्घसत्रं वा ऽएष ऽउ
पैति यो ब्रह्मचर्यमुपैति स यामुपयन्त्समिधमादधाति सा प्रायणीया
यां स्नास्यन्त्सोदयनीया ऽअथ या ऽअन्तरेण सत्र्या ऽएवास्य ता ब्राह्मणो
ब्रह्मचर्यमुपयन्त्चतुर्धा भूतानि प्रविशति ॥ अग्निं पदा मृत्युं पदा
चार्यं पदात्मन्येवास्य चतुर्थः पादः परिशिष्यते ॥२॥ स यदग्नये स
मिधमाहरति ॥ य ऽएवास्याग्नौ पादस्तमेव तेन परिक्रीणाति तं संस्कृ

16

स्यात्संधत्ते स एनमाविशति ॥४॥ अथ यदात्मानं दरिद्रीकृत्येव । अह्रीर्भूत्वा भिक्ष
ते य एवास्य मृत्यौ पादस्तमेव तेन परिक्रीणाति तं संस्कृत्यात्मन्संधत्ते स एनमा
विशति ॥५॥ अथ यदाचार्यवचस्करोति ॥ यदाचार्याय कर्म करोति य एवास्या
चार्ये पादस्तमेव तेन परिक्रीणाति तं संस्कृत्यात्मन्संधत्ते स एनमाविशति ॥६॥
न ह वै स्नात्वा भिक्षेत ॥ अप ह वै स्नात्वा भिक्षां जयत्यप ज्ञातीनामशनाया
मपपितृणां स एवंविद्वान्यस्यां एव दिशि वसेत्ततो भिक्षेत तानि जाद्यात्याकृस्त
लोक्यमिति स यद्यन्यां भिक्षितव्यां न विंददपि स्वामेवाचार्यजायां भिक्षेताथो
स्वां मातरं नैनं सप्तम्यभिक्षितातीयात्तमेवं विद्वांसमेवं चरंतं सर्वे वेदा
आविशंति यथा ह वा अग्निः समिद्धो रोचत एवं ह वै स स्नात्वा रोचते य एवं
विद्वान्ब्रह्मचर्यं चरति ॥७॥ ब्राह्मणम् ॥२॥ अध्यायः ॥ उद्दालको हारुणिरुदीच्यां
न्वृता धावयांचकार तस्य निष्क उपाहितः आसीत्तद्धैतत्पूर्वेषां वृतानां
धावयतामेकधनमुपाहितं न्वत्युपवल्हाय बिभ्यतां तान्होदीच्यानां ब्राह्मणा
॥१॥ कौरुपांचालो वा अयं ब्रह्मा ब्रह्मपुत्रः ॥ यद्ध नायमस्मान्नप
नीर्धि विवद हि तेनैब्रह्मोद्यमाकुर्यामहा इति किं न वीरेति स्वैदायनेनेति
यद्दीत हितेन... स्वैदायन आस ॥२॥ तान्हस्तुः ॥ स्वैदायन त्वं यावीरेण मंत्रेणसं
त्योनको ह स्वैदायनः आस साहावावो पात्र स्वरूरमतां ह त्वं नैं वेदानीतितन्त्वा नि
यतामहा इति

ना १ [illegible]

प्रपद्दृतः हास्ति प्रपन्नोमृत्युवा दास्वेदाय ३५ इति ह ३ गोतमस्य पुत्रेती तरः प्रति
शुश्रावतः हततऽएव प्रष्टुं दध्ने ।।३।। सवै गोतमस्य पुत्र ऋतुजनं धावयेत् ।।
प्यादर्शपूर्णमासाभ्यां यष्ट्वा पुरस्तादाज्यमुगाविं ।।४।। सवै गोतमस्य पुत्र ऋतो
जनं धावयेत् ।। यस्तु दर्शपूर्णमासाभ्यां विद्याद्यस्मादिमाः प्रजाः ऋअदंतकाजा
यीते यस्मादासं जायंते यस्माद्दासां प्रलिप्यंते यस्माद्दासां संतिष्ठंते यस्माद्
सां पुनरुत्तमे वयसि सर्वेऽएव प्रलिप्यंते यस्माद्धरऽएवाग्रे जायंते तथोत्तर
यस्माद्दलीयाः । सऽएवाधरे प्रथीयाः । सऽउत्तर यस्माद्दृं ह्रस्ववर्षीयाः । सो
।।७।। यस्मात्समाऽएव जंत्याः ।।५।। सवै गोतमस्य पुत्र ऋतोजनं धावयेत् ।। यस्तु दर्श
नर्णमासाभ्यां विद्याद्यस्मादिमाः प्रजा लोमशा जायंते यस्माद्दासां पुनरवि ।।१०।।
श्मश्रूत्पापप ल्यालिं दुबीरि लोमानि जायंते यस्मा सद्ये पाप्य वाय पलितो नव
त्यथ पुनरुत्तमे वयसि सर्वेऽएव पलितो नवति ।।६।। सवै गोतमस्य पुत्र ऋतो
जनं धावयेत् ।। यस्तु दर्शपूर्णमासाभ्यां विद्याद्यस्मात्कुमारस्य रेतः सिक्तेन स
नवति यस्माद्दस्य मध्यमे वयसि संनवति यस्माद्दस्य पुनरुत्तमे वयसि न
संनवति ।।७।। वागायत्री । हरिणी ।। ज्योतिष्पक्षां यजमानं स्वर्गं लोकम्
नि वहंती विद्याद्दिति तस्मिन्हृहनिधौ प्रददाव वृचानः स्विदाय नास्मि सुवर्सं

वावसुवर्षं विवेद दतीति ततः स्रोपगुह्य निष्क्रामत ५ तप प्रच्छुः किमिवेषगोत
मस्य पुत्रो ह्यान्तूदिति ॥८॥ साहोवाच ॥ यथा ब्रह्मा ब्रह्मपुत्रो मेऽद्य स्यद्यपते द्यु
एनमुपवल्हेतेति तु हतत ऽएव ह्निप्रयुक्त ५ हत तऽएव समि स्यातिः प्रतिचक्रामस
उपत्वायानीति किम ध्येष्यमाणऽ इति यानेव माप्रश्नान प्राक्षीस्तानेव मे विब्रू
हीति सहोवाचानु पिता पिवतऽएनान्ब्रवानीति ॥९॥ तस्माऽउ हैतदु वाच ॥ द्वा वा
घारौ पंच प्रयाजाऽ आग्नेयऽ आज्यभागा षष्ठऽ एतद्धो पुरस्तादाज्यभागाः सो
म्यऽ आज्यभागो हविर्भागानां प्रथमो हविर्हि सोमऽ आग्नेयः पुरोडाशोऽग्नी
षोमीयऽ उपांशु ५ याजोऽग्नीषोमीयः पुरोडाशोऽग्निः स्विष्टकृदिति पंचमध्यतो
हविर्भागाः ॥१०॥ प्राशित्रं चेडा च ॥ ब्रह्माग्नीधऽ आदधाति ब्रह्मभागो यजमानभा
गोन्वाहार्यऽ एते षड्भाजा पत्न्याम्या नुयाजाश्चत्वारः पत्नीसंयाजाः समिष्ट
यजुरष्टमामात छाऽउपरिष्टादाज्यभागाः ॥११॥ अथ यद्दूरानुवाक्यकाः
प्रयाजा भवंति ॥ तस्मादिमाः प्रजाऽअदंतका जायंते तथ यद्दूरानुवाक्यवंति हवीं ५
षि भवंति तस्मादासां जायंते तथ यदपुरानुवाक्यकाऽअनुयाजा भवंति तस्मा
दासां प्रक्षिद्धीते तथ यदपुरानुवाक्यावंतः पत्नीसंयाजा भवंति तस्मादासां ५ सतिष्ठे
तथ यदपुरानुवाक्यकं ५ समिष्टयजुर्भवति तस्मादासां पुनरुत्तमे वयसि स
र्वऽएव प्रभिद्यंते ॥१२॥ शतं ॥ ५७०० ॥ अथ यदनुवाक्या मन्वाह ॥ याज्यया यजति

तस्मादध यऽ एवाग्येत्नायं तथोत्तरेथ यद्गायत्रीमनुच्य त्रिष्टुभायजति तस्माद्दली
याꣳसऽ एवाधरे प्रथीयाꣳसऽ उत्तरेथ यत्स्राचाघ्राचाघौरावाघारयति तस्मा
द्दृꣳह्रा घषीयाꣳसोथ यत्सꣳदसा विवृसौ यज्येन्नवतस्तस्मात्समाऽ एवजंल्याऽ
॥२३॥ अथ यद्बर्हिस्तृणाति तस्मादिमाः प्रजालोमशा जायंतेथ यत्पुनरवि
प्रस्तरꣳ स्तृणाति तस्मादासां पुनरिव श्मश्रूण्योपपक्ष्याणि दुबौ हि लाति जायं
तथ यत्केवलमेवाग्रे प्रस्तरमनुप्रहरति तस्माच्छीर्षण्ये वाग्रे पलितानि भवंत्य
थ यत्सर्वमेव बर्हिरनुप्रहरति तस्मात्पुनरुत्तमे वयसि सर्वऽ एव पलितो
॥१८॥ भवति॥२४॥ अथ यदाज्यहविषः प्रयाजा भवंति॥ तस्मात्कुमारस्य रेतः सिक्तं
न संभवत्युदकमिवैव भवत्युदकमिव ह्याज्यमथ यन्मध्ये यज्ञस्य दध्नाचु
राडशो नेति वरेति तस्माद्दस्य मध्यमे वयसि संभवति द्रप्सीव हि भवति द्रप्सी ॥१८॥
व हि रेतोथ यदाज्यहविषऽ एवानुयाजा भवंति तस्माद्दस्य पुनरुत्तमे वयसि
न संभवत्युदकमिवैव भवत्युदकमिव ह्याज्यं॥२५॥ त्रिवृदि रेवगायत्री॥ तस्यै
त्वाविष्टुप्रस्तादाज्यभागाः सदौ होतारः पञ्च प्रयाजाऽ उपरिष्टादाज्यभागाः सऽ उ
त्तरः पक्षः सैषा गायत्री हरिणीज्योतिष्पक्षा यजमानꣳ स्वर्गं लोकमभि
वहति यऽ एवमेतद्वेद ॥२६॥ ब्राह्मणम् ॥ ७ ॥ अथातः सुवाराद्दानस्य॥
तद्धैतदेके कुर्याल्लामन्यमानाद्दक्षिणाने वजुह्वमाददते सर्वतोपनतं
न तथा कुर्यादाहाहनेत तत्र ह यास्वतिप्रतिनाऽ अयम घधु यजमानस्य

छिषंतं भ्रातृव्यमकस्त्रत्युद्यामिनामितीश्वरोऽहतथैव स्यात् ॥ १ ॥ उल्मुके वकुर्यात् ॥
उत्तान्यामिव पाणि न्याञ्जु दृ परिगृह्योपन्न सप्धि निदध्यात्तस्यानापमीमा ८
माक्ति तस्य शं व्य मायुष्यात्तेऽ असहु ८ त्रिंजयन्ना ददीत ॥ २ ॥ अथातातातिक्र
मणस्य ॥ चद्रोतारहवाऽ अन्याध्वर्युर्यजमानस्य पश्चान्विधमति चद्रोतारहास्माऽ
अन्यऽउपसमूहत्यध्वर्युःहवाऽ अध्वर्युर्बुद्गातायजमानस्य पश्चान्विधमति
यऽ आश्रावयिष्यं दक्षिणेनातिक्रामति स व्यनाश्रा व्याध्वहास्माऽ एवं
च समूहति यऽ आश्रावयिष्यं त्सव्यनातिक्रामति दक्षिणेनाश्राव्य ब
स्माऽ उपसमूहति ॥ ३ ॥ अथातोधारणस्य ॥ तद्धैतद्वैके कुशलास न्यमानाः
प्रगृह्य बाहू स्रुचौ धारयति न तथा कुर्याद्याहनंतत्र व्रुयाच्चु लोन्याऽ अयम
ध्वर्युर्बाहू ऽ अकृतश्चलबाहुर्नं विध्यतीतीश्वरोऽहतथैव स्याद्यथा हि षमध्यमः
प्राणस्तस्माद्युतमुपन्य ह्यावि वधारयेत् ॥ ४ ॥ अथातऽ आश्रावणस्य ॥
षद्धवाऽ आश्राविताति न्यक्रियं गृध्वं रूपत्वं बहिः श्रयतः श्रिया ॥ ५ ॥ एतद्ध
त्वेन्यकः ॥ वायमुद्ध्व राददाय त्रानेनि दधाति स य मिच्छेत्स्यापीयांत्स्यादिति
तस्याद्विरादाय स्त्रानेनि दध्यात्तन्न स पापीयान्भवति ॥ ६ ॥ अथ हैतत्त्रियक ॥
ष्यायं यावते वाद त्तेतावता निदधाति स य मिच्छेन्नि वश्रेयांत्स्यान्न पापी
यानिति तस्य यावाते वाददीत ताव तानि दध्यात्तेन न सानेवश्रेयां न पापी

ऽ॥१२

याञ्जवति॥७॥ अथाहैतद्ध्रुवां॥ यो यं ज्ञानेपादाय योऽग्रे निदधाति सय यमिच्छे
च्छुयांत्स्यादिति तस्य ज्ञानेरादायाप्सु निदध्यात्तेन सश्रेयान्भवति॥८॥
अथाहैतल्लुप्तं॥ यो यमनु दीर्घमक्षरमाश्रावयति ज्याहिनं तत्र ब्रूया
ल्लुप्तं न्वाऽ अयमध्वर्युर्यजमानमकद्विषतान्नात्स्मस्या पावसायिन
मितीश्वरो हैतथैव स्यात्॥९॥ अथाहैतद्बहिःश्रि॥ यो यमपव्यादायोष्ठाऽ
उच्चैरक्षरमाश्रावयति श्रौविक्षरो बाध्यतेऽ एव तच्छिद्रं धत्ते शान्तायुको
नवति॥१०॥ अथाहैतदन्तःश्रि॥ यो यं संधायोष्ठाऽउच्चैः स्वरवदाश्रावयति
॥२३॥ श्रौविक्षरान्तरतऽ एव तच्छिद्रं धत्ते न्यादान्नवति॥११॥ सप्त्वे मन्द्र मिवोरसि॥
यंरास्तन्वोनयताबार्हतमुच्चैरन्ततो निदध्यान्न स्वनोपमीमांसास्ति॥२३॥
तत्परं श्रव्यमायुष्यं॥१२॥ अथातो ताहामस्य॥ ताद्धैतदकेकुरालामन्यमा
१२ नाः प्राचींऽ स्रुचमुपावजियमाहृत्य कृत्वा पर्यावृत्योपस्तृणे विधि निदधाति
न तथा कुर्याद्याहिनं तत्र ब्रूयादनुपुवन्वाऽ अयमध्वर्युर्यजमानम
कद्विषतान्नात्स्यस्यान्ववसायिनमितीश्वरो हैतथैव स्यात्॥१३॥
पार्श्वतऽउ हैके॥ स्रुचमुपावहृत्य कृत्वा पर्यावृत्योपस्तृणे विधि निदधाति
न तथा कुर्याद्याहिनं तत्र ब्रूयादन्तर्धिनन्वाऽ अयमध्वर्यू राकृतीः

ग्रारोत्सीत्संवाद्यारिष्यात घृतात्रिर्प्रज्ञिविष्यतीतीश्च यो ह तथैवस्यात्॥१४॥
इन्द्रमेव कुर्यात्॥ प्राचीमेव स्रुवमुपवहृ यज्ञ त्वातानेवाधि हृत्योपवस्य
धि निदध्यात्तस्य नोपमीमांसास्ति तस्य श्राव्यमायुष्यं॥१५॥ प्रदग्धाहुतिर्हु
र्प
वाऽग्न्याधेयं॥ आहुती होन्यः सं तयत्येष हावे प्रदग्धाहुति र घ्नयुर्वा
यमाज्यं कृत्वा वदानानि जुहोत्यतं हावितद्दह्यमानाद्यागान्युवा
द प्रदग्धाहुति र्न्वीऽ अथ यमघयुरि त्यथाह नऽ एवसं तर्पयति प्यायमा
ज्यं कृत्वा वदानानि जुहोत्यथ पुनरंततऽ आज्येनानि जुहोत्येष हैनाः
सीतर्पयति तासां संतृप्तानां दर्वाहिरण्यपाश्चमसान्नरयते॥१६॥ काऽ
तद्धाह्नवाच यो हवक्यः॥ यद्वाऽउपस्तीर्यावदायाभिघारयति तदावनाः सैतर्प
यतितासां संतृप्तानां दर्वाहिरण्यपाश्चमसान्नरयेत यत्किञ्च्छलग्न हप
तीनाऽ हवेन्नो [illegible] पनो घर्यरासः॥१७॥ साहावाच॥ इदमहिदं स्वर्गम
हाप श्च ल्याज्यमथायं गृहपतिरस्मीति मन्यतऽ इति॥१८॥ साहो वोच॥ अ
घर्य वावे नाकृद्यऽ एतद्वित श्रुचाच्चाप्यच्चं संघेन्नरं नाशकऽ आदुतु
यद्धित्वाहमेताया रन्तु शिष्यां प्रव्रजया पशुभिर्जोयथाऽ अनिश्चर्मेला
कैवाहरिति॥१९॥ साहावाच॥ उपत्वायानीति [illegible] वात्र वाव खल्व

हिंसिषोनः संवत्सरे घर्युरन्नू रनुपेतायेवत ऽ [illegible] मासीति तस्मादु हे
तद्दिवस्क्रचो रादानमयमुवाचे यादिव तद्धार ख्याम तस्मादेवं विदमेवाध्व
र्यं कुर्वीत नानेवं विदं॥२०॥ ब्राह्मणम्॥८॥ द्वितीयः प्रपाठकः समाप्तः कण्डिका॥१०॥
॥प्रजापतिर्वै प्रजाः सृजमानोतप्यत॥ तस्माच्छ्रांतात्तेपानाच्छ्रीरुदक्रामत
सा दीप्यमाना भ्राजमाना लेलायंत्यतिष्ठत्तां दीप्यमानां भ्राजमानां
लेलायंतीं देवा ऽभ्यध्यायन्॥१॥ तत्प्रजापतिमब्रुवन्॥ हनामेमा
मेदमस्या आदामहा ऽ इति स होवाच स्त्री वा ऽ एषा यच्छ्रीर्न वि स्त्रियं घ्नंत्युत त्वा ऽ ॥२०
ददा २०॥ अस्या जीवंत्या ऽ एवाददत इति॥२॥ तस्या ऽ अग्निरन्नाद्यमादत्त॥ सो
मो राज्यं वरुणः साम्राज्यं मित्रः क्षत्रमिन्द्रो बलं बृहस्पतिर्ब्रह्मवर्चसं
सविता राष्ट्रं पूषा भगं सरस्वती पुष्टिं त्वष्टा रूपाणि॥३॥ सा प्रजापति
मब्रवीत्॥ आ वा इम ऽ इदमदिषतेति स होवाच यज्ञेनेनान्पुनर्याच
स्वेति॥४॥ सैतां दशहविषमिष्टिमपश्यत्॥ आग्नेयमष्टाकपालं
पुरोडाशं सौम्यं चरुं वारुणं दशकपालं पुरोडाशं मैत्रं चरुमैन्द्रमेकादश
कपालं पुरोडाशं बार्हस्पत्यं चरुं सावित्रं द्वादशकपालं वाष्टाकपालं वा
पुरोडाशं पौष्णं चरुं सारस्वतं चरुं त्वाष्ट्रं दशकपालं पुरोडाशं॥५॥

मैत्रं चरुं ३

ता नेतमायाऽनुवाक्ययान्ववदत ॥ अग्निः सोमो वरुणो मित्र इन्द्रो
बृहस्पतिः सविताऽयः सहस्री ॥ पूषा नो गोभिरवसा सरस्वती त्वष्टा
प्र २ रूपाणि समनक्तु यज्ञैरिति तस्युपातिष्ठन्त ॥ ६ ॥ ता नेतयाजान्वया ॥
परस्तात्सुति लोमं प्रत्यैत्त्वष्टा रूपाणि ददती सरस्वती पूषा भगं
सविता मे ददातु ॥ बृहस्पतिर्द्दद्विन्द्रो बलं मे मित्रः क्षत्रं वरुणः सो
मोऽग्निरिति तपुनर्हिनायां प्रियैत ॥ ७ ॥ स्वि तानुपहोमान पश्यन्त ॥
अग्निरन्नादोऽन्नपतिरन्नाद्यमस्मिन्यज्ञे मयि दधातु स्वाहेत्याहु
मे वा दायाग्निरुदक्रामत्सुनरस्याऽन्नाद्यमददात ॥ ८ ॥ सोमो
राजा राजपतिः ॥ राज्यमस्मिन्यज्ञे मयि दधातु स्वाहेत्याहुतिमेवा
दायसोमऽउदक्रामत्सुनरस्य राज्यमददात ॥ ९ ॥ वरुणः सम्राट्सम्रा
ट्पतिः ॥ साम्राज्यमस्मिन्यज्ञे मयि दधातु स्वाहेत्याहुतिमेवादाय वरुण
सा उदक्रामत्सुनरस्य साम्राज्यमददात ॥ १० ॥ मित्रः क्षत्रं क्षत्रपतिः ॥ क्षत्रम
स्मिन्यज्ञे मयि दधातु स्वाहेत्याहुतिमेवादाय मित्रऽउदक्रामत्सु
नरस्य क्षत्रमददात ॥ ११ ॥ इन्द्रो बलं बलपतिः ॥ बलमस्मिन्यज्ञे मयि
दधातु स्वाहेत्याहुतिमेवादायेन्द्रऽउदक्रामत्सुनरस्य बलमददात ॥ १२

बृहस्पतिर्ब्रह्म ब्रह्मपतिः॥ ब्रह्मवर्च्चसमस्मिन्यज्ञे मयि दधातु स्वाहेत्याहुति
मेवादाय बृहस्पतिरुद्गात्रा स्तुनरस्य ब्रह्मवर्च्चसमददात्॥१३॥ सवि
ता राष्ट्रं राष्ट्रपतिः॥ राष्ट्रमस्मिन्यज्ञे मयि दधातु स्वाहेत्याहुतिमेवादाय
सविता दक्षोमस्तुनरस्य राष्ट्रमददात्॥१४॥ पूषा भगं भगपतिः॥ भगमस्
मिन्यज्ञे मयि दधातु स्वाहेत्याहुतिमेवादाय पूषा दक्षोमस्तुनरस्य भ
गमददात्॥१५॥ सरस्वती पुष्टिं पुष्टिपतिः॥ पुष्टिमस्मिन्यज्ञे मयि दधातु स्वा
हेत्याहुतिमेवादाय सरस्वत्युद्गात्रा मस्तुनरस्य पुष्टिमददात्॥१६॥ त्वष्टा ॥२२॥
रूपाणि रूपकृद्रूपपतिः॥ रूपाणि पशून्स्मिन्यज्ञे मयि दधातु स्वाहेत्याहुति
॥२१॥ मेवादाय त्वष्टा दक्षोमस्तुनरस्य पशूनददात्॥१७॥ ता वा एताः॥ दश
देवता देवसुवां हविर्द्युत्याद्दशादशद्विनी विराड्दीर्घे राड्दी
याद्धि तद्विराज्यं नाद्य प्रतितिष्ठति॥१८॥ तास्य पंच द्वशा सामिधेन्या
न्वैति॥ उपांशु देवता यजति पंच प्रयाजा जुहोति त्रयानुयाजाः एकं
समिष्टयजुः पुष्टिमंतावाज्यभागावग्निना रयिमश्नवत्पोषमेव दिवे
दिवे॥ यशसं वीरवत्तमं॥ गयस्फानो अमीवहा वसुवित्पुष्टिवर्द्धनः॥
सुमित्रः सोमानान्वेति सहस्रवत्या संयाज्ये नानाराष्ट्र सहस्रव
त्ता पकवत्पुष्टिमद्वसु॥ पुमद्रत्नं सवीर्यं नृषिंष मनुपद्यते॥ उतेनान

ब्रह्मन्नविषद्धकेष्वादेवकृतमः॥ शान्तः शोचामरुद्धयोगेसहस्रसातमस्
इति॥१२॥ तां हैतां गातमोराद्ध गातमो विदांचकार सा ह जनकं वैदेहं प्रत्युत्ससा
दतां हैतं गजिह्वालक्षोष्वन्निवियषतामुह याज्ञवल्क्यो निवेदसहोवाच सहस्रं गा
याज्ञवल्क्य ददाम्यस्मिन्नयिं त्वपिमित्रविंदाम न्वविदामेति यं विदते मित्रं
राष्ट्रमस्यजनवस्य पपुनर्म्मयुजयति सर्वमायुरेति य एवं विद्वान् तये
ष्ट्या यजते यादेवतदेवं विद्द॥२०॥ ब्राह्मणम्॥१॥ अथातो हविषः समृद्धिः॥
षड्वि ब्रह्मणो द्वारोऽग्निर्वायुरापश्चंद्रमा विद्युदादित्यः॥१॥ स यद्धपदग्धेन
हविषा यजते॥ अग्निना ह स ब्रह्मणो द्वारेण प्रतिपद्यते सोऽग्निना ब्रह्म
ह द्वारेण प्रतिपद्य ब्रह्मणः सायुज्यं सलोकतां जयति॥२॥ अथ यो वि
ला पति ते न हविषा यजते वायुना ह स ब्रह्मणो द्वारेण प्रतिपद्यते स वायुना
ब्रह्मणो द्वारेण प्रतिपद्य ब्रह्मणः सायुज्यं सलोकतां जयति॥३॥ अथ य आ
श्रुतेन हविषा यजते॥ अद्भिर्ह स ब्रह्मणो द्वारेण प्रतिपद्यते सोऽद्भिर्ब्रह्म
णो द्वारेण प्रतिपद्य ब्रह्मणः सायुज्यं सलोकतां जयति॥४॥ अथ यद्धुव
रत्नेन हविषा यजते॥ चंद्रमसा ह स ब्रह्मणो द्वारेण प्रतिपद्यते स चं
द्रमसा [illegible] ब्रह्मणो द्वारेण प्रतिपद्य ब्रह्मणः सायुज्यं सलोकतां जयति॥५॥

अथ यो ऽल्पाहितेन हविषा यजते। विद्युता ह स ब्रह्मणो द्वारेण प्रतिपद्यते स
विद्युता ब्रह्मणो द्वारेण प्रतिपद्य ब्रह्मणः सायुज्यं सलोकतां जयति॥६॥ अ
थ यः सुश्रृतेन हविषा यजते। आदित्येन ह स ब्रह्मणो द्वारेण प्रतिपद्य
ते स आदित्येन ब्रह्मणो द्वारेण प्रतिपद्य ब्रह्मणः सायुज्यं सलोकतां
जयति। सैषा हविषः समृद्धिः स यो हैवमेतां हविषः समृद्धिं वेद सर्वसमृ
द्धेन हैवास्य हविषेष्टं भवति॥७॥ अथातो यज्ञस्य समृद्धिः॥ यद्वै यज्ञ
॥२२॥ स्य न्यूनं प्रजननमस्य तदथ यदतिरिक्तं पशव्यमस्य तदथ यत्संकसु ॥२२॥
कं श्रियं अस्य तदथ यत्संपन्नं स्वर्ग्यमस्य तत्॥८॥ स यदि मन्येत।
न्यूनं मे यज्ञे ऽभूदिति प्रजननं म एतत्प्रजनिष्य इत्येवं तदुपासीत॥९॥ अ
थ यदि मन्येत। अतिरिक्तं मे यज्ञे ऽभूदिति पशव्यं म एतत्पशुमान्भवि
ष्यामीत्येवं तदुपासीत॥१०॥ अथ यदि मन्येत। संकसुकं मे यज्ञे ऽभूदिति
श्रियं म एतद्यामा श्रीस्तेजः सा यशः सा ब्रह्मवर्चसं न परिह्वृता गमिष्यती
त्येवं तदुपासीत॥११॥ अथ यदि मन्येत। संपन्नं मे यज्ञे ऽभूदिति स्वर्ग्यं म
एतत्स्वर्गे लोके भविष्यामीत्येवं तदुपासीत। सैषा यज्ञस्य समृद्धिः स
यो हैवमेतां यज्ञस्य समृद्धिं वेद सर्वसमृद्धेन हैवास्य यज्ञेनेष्टं भवति॥१२॥ ब्रा० ३ अध्या०

उर्वशी हाप्सराः ॥ पुरूरवसमैडं चकमे तं ह विंदमानोवाच त्रिः स्म माह्नो वैत
सेन दंडेन हताद कामां स्म मा निपद्यासै मो स्म त्वा नग्नं दर्शमेष वै न स्त्री
णामुपचार इति ॥१॥ सा हास्मिंज्योगुवास ॥ अपि हास्माद्गर्भिण्यास तावज्ज्यो
ग्घास्मिन्नुवास ततो ह गंधर्वाः समूदिरे ज्योग्वा इयमुर्वशी मनुष्ये
ष्ववात्सीदुपजानीत यथेयं पुनरागच्छेदिति तस्यै हाविरुरणा शयन
उपबद्धास ततो ह गंधर्वा अन्यतरमुरणं प्रमेथुः ॥२॥ सा होवाच ॥ अवी
र इव बत मे ऽजन इव पुत्रं हरंतीति द्वितीयं प्रमेथुः सा ह तथै
वोवाच ॥३॥ अथ हायमीक्षां चक्रे ॥ कथं नु तदवीरं कथमजनं स्याद्य
त्राहं स्यामिति स नग्न एवानूत्पपात चिरं तन्मेने यद्वासः पर्यधा
स्यत ततो ह गंधर्वा विद्युतं जनयांचक्रुस्तं यथा दिवा तथा नग्नं ददर्श ततो ह
वेयं तिरोबभूव पुनरैमीत्येति एनं तान्स आध्याज्जल्पन्कुरुक्षेत्रं स
मयाचचारान्यतःप्लक्षेति बिसवती तस्यै हाध्यंतेन वव्राज तद्ध ता अप्सर
स आतयो भूत्वा परिपुप्लुविरे ॥४॥ तं हेयं ज्ञात्वोवाच ॥ अयं वै स
मनुष्यो यस्मिन्नहमवात्समिति ता होचुस्तस्मै वा आविरसामेति तथे
ति तस्मै हाविरासुः ॥५॥ तां हायं ज्ञात्वाभिपरोवाद ॥ हये जाये मनसा

तिष्ठ घोरे वचांसि मिश्रा कृणवावहै नु ॥ न नौ मन्त्रा अनुदितास एते मयस्क
रन्परतरे चनाहन्निति सु उपनु रमसं नुवदावहा इति हैवैनां तदुवाच ॥ ६ ॥ तं हैत
रा प्रत्युवाच ॥ किमेता वाचा कृणवा तवाहं प्राक्रमिषमुषसामग्रियेव ॥ पुरूरवः
पुनरस्तं परेहि दुरापना वात इवाहमस्मीति न वै त्वं तदकरोर्यदहमब्रव
दुरापा वा अहं त्वयेतर्हि स्मि पुनर्गृहानिहीति हैवैनं तदुवाच ॥ ७ ॥ अथ हा
यं परिद्यून उवाच ॥ सुदेवो अद्य प्रपतेदनावृत्परावतं परमां गन्तवा उ ॥
॥१२३॥ अधा शयीत निर्ऋतेरुपस्थेऽधैनं वृका रभसासो अद्युरिति सुदेवोऽद्योद्व
बध्नीत प्र वा पतेत्तदेनं वृका वा श्वानो वाद्युरिति हैवैतदुवाच ॥ ८ ॥ तं हैत ॥१२३॥
रा प्रत्युवाच ॥ पुरूरवो मा मृथा मा प्रपप्तो मा त्वा वृकासो अशिवास उ
२३ क्षन् ॥ न वै स्त्रैणानि सख्यानि सन्ति सालावृकाणां हृदयान्येतेति मैतदादृथा
न वै स्त्रैणं सख्यमस्ति पुनर्गृहानिहीति हैवैनं तदुवाच ॥ ९ ॥ यद्विरूपाचरं ॥
मर्त्येष्ववसं रात्रीः शरदश्चतस्रः ॥ घृतस्य स्तोकं सकृदह्न आश्नां तादेवे
दं तातृपाणा चरामीति तदेतदुक्तप्रत्युक्तं पञ्चदशर्चं बह्वृचाः प्राहुस्तस्यै ह
हृदयमाव्ययां चकार ॥ १० ॥ सा होवाच ॥ संवत्सरतमीं रात्रिमागच्छतात्ते
न एकां रात्रिमन्ते शयिता से जात उ तेऽयं तर्हि पुत्रो भवितेति स ह संव

त्सरतमीं रात्रिमाजगाम हिरण्यविमितानि ततो हैनमेकमूचुरेतत्प्रपद्यस्वेति
तद्धास्मै तामुपप्रजिघ्युः ॥११॥ सा होवाच गंधर्वा वै ते प्रातर्वरं दातारस्तं वृणा
सा इति तं वै मे त्वमेव वृणीष्वेति युष्माकमेवैकोसानीति ब्रूतादिति तस्मै ह प्रा
तर्गंधर्वा वरं ददुः स होवाच युष्माकमेवैकोसानीति ॥१२॥ ते होचुः न वै साम
नुष्येष्वेषा तनूरस्ति ययेष्ट्वास्माकमेकः स्यादिति तस्मै ह स्थाल्यामोप्याग्निं
प्रददुरनेनेष्ट्वास्माकमेको भविष्यसीति तं च ह कुमारं चादायावव्राज स आरण्य
एवाग्निं निधाय कुमारेणैव ग्राममेयाय पुनरेमीत्येति तिरोभूतं यो ग्निरश्वत्थं
तं यास्थाली सा शमीं तां स ह पुनर्गंधर्वानीयाय ॥१३॥ ते होचुः संवत्सरं चातु
ष्प्राश्यमोदनं पच स एतस्यैवाश्वत्थस्य तिस्रस्तिस्रः समिधो घृतेनान्वज्य
समिद्वतीभिर्घृतवतीभिर्ऋग्भिरभ्याधत्तात्स यस्ततो ग्निर्जनिता स एव स भवि
तेति ॥१४॥ ते होचुः परोक्षमिव वा एतदाश्वत्थीमेवोत्तरारणिं कुरु शमी
मयीमधरारणिं स यस्ततो ग्निर्जनिता स एव स भवितेति ॥१५॥ ते होचुः ॥
परोक्षमिव वा एतदाश्वत्थीमेवोत्तरारणिं कुरुष्वाश्वत्थीमधरारणिं स
यस्ततो ग्निर्जनिता स एव स भवितेति ॥१६॥ स आश्वत्थीमेवोत्तरारणिं चक्रे ॥
आश्वत्थीमधरारणिं स यस्ततो ग्निर्जज्ञे स एव स आस तेन हेष्ट्वा गंध
र्वाणामेक आस तस्मादाश्वत्थीमेवोत्तरारणिं कुर्वीताश्वत्थीमधरारणिं

स यस्तानि निर्द्धीयात स ऽ एव स भवति तं नेष्टुर्गंधर्वादामेको भवति ॥७॥ ब्रा० ॥३॥
प्रजापतिश्चातुर्मास्यैरात्मानं विदधे ॥ स ऽ इममेव दक्षिणं बाहुं वैश्वदेवं
हविरकुरुत तस्यायमेवाङ्गुष्ठ ऽ आग्नेयं हविरिदं सौम्यमिदं सावित्रं ॥१॥
सा वै चर्षिष्ठः पुरोडाशो भवति ॥ तस्मादियमासां चर्षिष्ठेदं सारस्वतमिदं पौ
ष्णमथ य ऽ एष ऽ उपरिष्टाद्बाहुस्तस्य संधिस्तन्मारुतमिदं वैश्वदेवं द्यावा
पृथिवीयं तद्वा ऽ अनिरुक्तं भवति तस्मात्तदनिरुक्तं ॥२॥ अथायमेव दक्षिण ऽ ऊ
रुर्वरुणप्रघासास्तस्य यानि पञ्च हवींषि समानानि ता ऽ इमाः पञ्चाङ्गुलयः
॥२६॥ कुल्फावेवैन्द्राग्नं हविस्तद्धि द्विदेवत्यं भवति तस्मादिमौ द्वौ कुल्फाविदं ॥२६॥
वारुणमिदं मारुतमन्नकं कायं तद्वा ऽ अनिरुक्तं भवति तस्मात्तदनिरुक्तं ॥३॥
२५ मुखमेवास्यानीकवतीष्टिः ॥ मुखं हि प्राणानामनीकमुरः सांतपनीया
रसा हि समिव तप्यत ऽ उदरं गृहमेधीया प्रतिष्ठा वा ऽ उदरं प्रतिष्ठित्या ऽ
एव शिश्नमेवास्य क्रैडिनं हविः शिश्नेहि क्रीडतीवा यामेवाङ्गुष्ठ आ ऽ
आदित्येष्टिः ॥४॥ अथायमेवान्तर ऽ ऊरुर्महाहविः ॥ तस्य यानि पञ्च हवीं
षि समानानि ता ऽ इमाः पञ्चाङ्गुलयः कुल्फावेवैन्द्राग्नं हविस्तद्धि द्विदेवत्यं
भवति तस्मादिमौ द्वौ कुल्फाविदं माहेन्द्रमिदं वैश्वकर्मणं तद्वा ऽ अनि

रुक्तं भवति तस्मात्तदनिरुक्तमथ यदिदमंतरुदरे तत्पितृयज्ञस्तद्वाऽअनि
रुक्तं भवति तस्मात्तदनिरुक्तं ॥ ५ ॥ अथेममावास्तारा बाङ्कुः शुनासीरीयं ॥ तस्य
यानि पंच हवींषि समायीनि ताऽइमाः पंचांगुलयोऽथ यऽएषऽउपरिष्टा
दुत्तरस्य संधिस्तच्छुनासीरीयमिदं वाऽयमवदोः सोऽयं तद्वाऽअनिरुक्तं भवति
तस्मात्तदनिरुक्तं ॥ ६ ॥ तानि वाऽएतानि ॥ चातुर्मास्यानि त्रिषंधीनि द्विसम
स्तानि तस्माद्विमानि पुरुषस्यांगानि त्रिषंधीनि द्विसमस्तानि तेषां वै चतुर्णां
द्वयोः श्रीणि त्रीणि हवींषि चानिरुक्तानि भवंति द्वाद्वद्वयोः ॥ ७ ॥ अर्द्धप्रपाठकः ॥ पर्द ॥
तेषां वै चतुर्णां मध्यमेतत् ॥ तस्माच्चतुर्णामिरगे सयुतद्वयोः प्रणयंति तस्मा
द्वेवोत्यायमेत्येव मुह प्रजापतिश्चातुर्मास्यैरात्मानं विदधे तथोऽएवैवं विद्वा
जमानश्चातुर्मास्यैरात्मानं विधत्ते ॥ ८ ॥ तद्दाकुः ॥ स चैगा पत्रं त्रैष्ट्याद्वदं
हविः स्यात्सर्वं त्रिष्टुभं घरूणं प्रघासाः सर्वं जागतं महाहविः सर्वानुष्टुभं
शुनासीरीयं चतुष्टोमस्याप्यऽइति तदु तथा न कुर्याद्यथा स एतान्यति
संपद्यंत तानेवास्य सकामऽउपाप्तो भवति ॥ ९ ॥ तानि वाऽएतानि ॥ चातुर्मा
स्यानि द्वाषष्ठानि त्रीणि शतानि हस्यः संपद्यंते तद्दितिः संवत्सरं व
महाव्रतं वाऽप्नोत्यथो द्विप्रतिष्ठो वाऽअयं यजमानो यजमानामेवत

स्वर्गंलोकऽआयातयति प्रतिष्ठापयति ॥१०॥ ब्राह्मणम् ॥४॥ शौचेयो ह प्राची
नयोग्यः ॥ उद्दालकमारुणिमाजगाम ब्रह्मोद्यमग्निहोत्रं विविदिषि
ष्यामीति ॥१॥ स होवाच ॥ गौतम कातेऽग्निहोत्री कोद्वत्सः किमुपसृष्टा किं
संयोजनं किं दुह्यमानं किं दुग्धं किमाह्रियमाणं किमधिश्रितं किमवज्यो
त्यमानं किमद्भिः प्रत्यानीतं किमुद्वास्यमानं किमुद्वासितं किमुन्नीयमा
नं किमुन्नीतं किमुद्यतं किं ह्रियमाणं किं निगृहीतं ॥२॥ काहं समिध
॥२५॥ मादधाति ॥ कास्त्वं द्वे आहुती किमुपासीदः किमवेक्षिष्टाः को नु राहुतीः ॥३॥ ॥
किं हुत्वा प्रकम्पयसि ॥ किं स्रुवं परिमृज्य कुड्ये न्यमार्जीः किं द्वितीयं ॥२५॥
परिमृज्य दक्षिणतो हस्तमुपासीषदः किं पूर्वं प्राशीः किं द्वितीयं किमुत्सृ
प्यापाः किं स्रुच्य पऽआनीय निरोक्षीः किं द्वितीयं किं तृतीयामुत्तरां
दिशमुदाक्षीः किं जघनेनाहवनीयमपो न्यनैषीः किं समतिष्ठिपा
यदि वाऽएतद्विद्वानग्निहोत्रमहौषीस्त्वयं तद्धुतं यद्यु वाऽअविद्वान्
हुतमेव तद्इति ॥४॥ स होवाच ॥ इडवमेमानव्योऽग्निहोत्री वायव्यो
वत्सः सन्नुपसृष्टा विराड्योजनमाश्विनं दुह्यमानं वैश्वदेवं दुग्धं
वायव्यमाह्रियमाणमाग्नेयमधिश्रितमैन्द्राग्नमवज्योत्यमानं वारुण

मद्भिः प्रस्नानीतं वायव्यमुद्वासयमानं द्यावापृथिव्यमुद्वासितमाश्विनमुन्नी
यमानं विश्वदेवमुन्नीतं महादेवायोद्यतं वायव्यच्छेद्भिर्यमाणां विष्णवं निगृही
तं ॥५॥ अथ याउं समिधमादधाति ॥ आहुतीनाउं सा प्रतिष्ठा या ह्य वीहुति र्हि
वो स्तयाप्रेषं यदु पाश्वीष दंवार्हस्य त्यं तत्ख्यदात्ये च्छिषीमेचामुंव लोकेतनह्य
मधायोत्त राहुतिर्मीतया स्वर्गलोक धां ॥६॥ अथ यदुत्वा प्रकंपयामि ॥ धा
यव्यं तच्छ्रुचं परिमृज्य कुद्रे न्यमार्ष्टि समोषधिभिर्नस्यतेत्ती स्त नाप्रेषं यद्द्वितीयं
परिमृज्य दच्छिणातारुस्त मुपासीषदं पिद्रं स्त नाप्रेषं यत्तद्धं प्राचिषं मां तत नाप्रेषं
यद्द्वितीयं प्रजां तनाथ यदुस्त्र्यापां पुष्पं स्त नाप्रेषं यच्छ्रुचमुप आनीय निरा
च्छिषहुं सर्पा देवजनां स्ते नाप्रेषं यद्द्वितीयं गंधर्वाप्सरस स्तनाथ यत्तृतीयमे
तां दिशमुदोच्छिषहुं स्वर्गस्य लोकस्य तेन द्वारं व्यवारिषं यत्र घनेना हवनीय
माणान्यनिषमास्मे लोकाय ततन द्यहिमदो यस्म मति छि पं यत्र ख्यिव्याप्ठऊनं
तत्तेनाप्सुरमित्यत न्नोसगावं स्मा हतिहि वषा ॥७॥ न्नोवाया ॥ प्रच्या
मिंखुवंन ब गर्वंतमिति हाक्षेव प्राचीनं यो पति सा हा वाच यस्मिं न्कोल उद्दता
स्त नयः स्युरू पावहतानि पात्राति हापूर्वे स्या ऽअथ त ऽ आहवनीयेनुग
च्छद्विठेतद्रूपं यदत्रत्तु क्वाता नवनीतिवादहिते वा वपुरावि रादस्यज्यष्ठः

पुत्रो म्रियेत यस्यैतदविदितं स्याद्विद्यास्विवाहमतारिषमिति किं विदितं का
प्रायश्चित्तिरिति प्राणमुदानमप्यगादिति गार्हपत्यऽआहुतिं जुहुयात् स एव
प्रायश्चित्तिर्नीतदाग्नं कुर्वीयेत्यतन्नोऽनगवं सहेति होवाच ॥८॥ क्रोचेयो ऽजेष्टः ॥
प्रच्यामि त्वेव नगवंतमिति प्राच्येव प्राचीनयोग्येति स होवाच यत्र तऽएतन्नेव
कालगार्हपत्योऽनुगच्छेदुच्छेत् तद्भूयं यदत्रजुहुता भवतीति विद्वदति होवाच
पुरा विराद्धस्य गृहपतिर्म्रियेत यस्यैतदविदितं स्याद्विद्यास्विवाहमतारि
२६॥ षमिति किं विदितं का प्रायश्चित्तिरित्युदानः प्राणमप्यगादित्याहवनीयऽ ॥२६॥
आहुतिं जुहुयात् स एव प्रायश्चित्तिः कुर्वीयेत्यतन्नोऽनगवं सहेति होवाच ॥९॥
क्रोचेयो ऽजेष्टः ॥ प्रच्यामि त्वेव नगवंतमिति प्राच्येव प्राचीनयोग्येति स होवाच य
26 त्र तऽएतस्मिन्नेव कालेऽन्वाहार्यपचनोऽनुगच्छेदुच्छेत् तद्भूयं यदत्रजुहुता भव
तीति विद्वदति होवाच पुरा विराद्धस्य सर्वेप शवा म्रियेरन्यस्यैतदविदितं
स्याद्विद्यास्विवाहमतारिषमिति किं विदितं का प्रायश्चित्तिरिति व्या
नऽउदानमप्यगादिति गार्हपत्यऽआहुतिं जुहुयात् स एव प्रायश्चित्तिर्न
तदाग्नं कुर्वीयेत्यतन्नोऽनगवं सहेति होवाच ॥१०॥ क्रोचेयो ऽजेष्टः ॥ प्रच्या
मि त्वेव नगवंतमिति प्राच्येव प्राचीनयोग्येति स होवाच यत्र तऽएतस्मिन्ने

वकाले सर्वेग्नयोनुगच्छेयुर्विच्छ तद्रूयं यदत्रजुक्ततोनवतीति विद्दे ति हो
वाच पुरा विरादस्य दायादं कुलं स्यां द्यास्य तदविदितं स्यादिद्यानिस्व वा
हमतारिषमिति किं विदितं कां प्रायश्चित्तिरिति पुराविरादग्निं मथित्वायां दिचं
द्योता द्यायात्तां दिचमाहवनीयमुद्धृत्य द्यापयामाहुतिं जुहुयात् सर्विदा
६ समृद्धमेग्निहोत्रं ६ सर्वेदेवत्यं द्यायुव्र्ध्येव सचीति नूता न्यपियीति चायोः
पुनर्निस्वज्यांतासेव प्रायश्चित्तिर्न तदागः कुर्वीयेत्य तन्नो भगवस्व हेति
होवाच ॥११॥ शौचयोनहः॥ प्रच्छ्यामि त्वेवन्न भगवन्तमिति पृच्छ त्व प्रस्त्री तत्यो
ग्येति सहोवाच यत्स्ये तेस्मिन्नवकाल निवाते सर्वेग्नयानुगच्छेयुर्व्ये
तद्रूपं यदत्रत्सुक्ततोनवतीति विद्दे तिहोवाचाप्रियमवास्मिंल्लोके पच्चयेता
प्रियममुष्मिंन्यास्य तदविदितं स्यादिद्यातिस्व वाहमतारिषमिति किं
विदितं का प्रायश्चित्तिरिति पुराविरादग्निमथित्वा प्रांचमाहवनीयमु
द्धृत्य जघनेनाहवनीयमुपविश्याहमेवनत्विषु बियं ६ सर्वेद्याः
समृद्धमग्निहोत्रं ६ सर्वेदेवत्यं ब्राह्मणो ६ ह्येव सर्वाति नृतानि न्यपियेति
ब्राह्मणा पुनर्निस्वज्यैत तासेव प्रायश्चित्तीर्नतदागः कुर्वीयत्येयवाङ्य
हामि तन्नो पिदिषमिति होवाच ॥१२॥ शौचयोनहः॥ इमानि समित्काष्ठां

न्युपायानिन्न गवंतमिति साह्वावाव यादवं नावन्त्यो मक्षीति व्ययति ष्यादेह्युपेही
तितथ्येति तं ह्वापनित स्मिहिता ल्लोकत रांच्याहृति सुवाव यत्स त्यं तस्माद्
सत्यमेव वदेदिति ॥१३॥ ब्राह्मणोसि ॥५॥ ब्रह्मचर्यमागामित्याह ॥ ब्रह्मण ए
वैतदात्मानं निवेदयति ब्रह्मचार्यसानीत्याह ब्रह्मण एवैतदात्मानं प
रिददात्यथैनमाह को नामासीति प्रजापतिर्वै कः प्राजापत्यमेवैनं त
त्कृत्वोपनयते ॥१॥ अथास्य हस्तं गृह्णाति ॥ इन्द्रस्य ब्रह्मचार्यस्यग्निरा
चार्यस्तवाहमाचार्यस्तवासावित्येते वै श्रेष्ठे बलिष्ठे देवते एताभ्या
मेवैनं श्रेष्ठाभ्यां बलिष्ठाभ्यां देवताभ्यां परिददाति तथा हास्य ब्रह्म
चारी न कांचनार्त्तिमार्च्छति न स य एवं वेद ॥२॥ अथैनं भूतेभ्यः परिददाति ॥
प्रजापतये त्वा परिददामि देवाय त्वा सवित्रे परिददामीत्येते वै श्रेष्ठे वर्षि
ष्ठे देवते एताभ्यामेवैनं श्रेष्ठाभ्यां बलिष्ठाभ्यां वर्षिष्ठाभ्यां देवताभ्यां
परिददाति तथा हास्य ब्रह्मचारी न कांचनार्त्तिमार्च्छति न स य एवं वेद ॥३॥
अद्भ्यस्त्वौषधीभ्यः परिददामीति ॥ तदेनमद्भ्यश्चौषधिभ्यश्च परिद
दाति द्यावापृथिवीभ्यां त्वा परिददामीति तदेनमाभ्यां द्यावापृथिवीभ्यां त्वा
परिददामीति तदेनमाभ्यां द्यावापृथिवीभ्यां परिददाति विश्वेभ्यस्त्वा सर्वेभ्यो

विश्वेभ्यस्त्वा भूतेभ्यः परिददाम्यरिष्ट्या ऽ इति तदेनं सर्वेभ्यो भूतेभ्यः परिददा
त्यरिष्ट्यै तथा हास्य ब्रह्मचारी न कांचनार्त्तिमार्छति न स य ऽ एवं वेद ॥४॥ शतप
ब्रह्मचार्यसीत्याह ॥ ब्रह्मण ऽ एवैनं तत्परिददात्यपोशानेत्यमृतं वा ऽ आ
पो ऽमृतमशानेत्येवैनं तदाह कर्म कुर्व्विति वीर्यं वै कर्म वीर्यं कुर्व्वित्येवैनं
तदाह समिधमाधेहीति समिन्द्धात्मानं तेजसा ब्रह्मवर्च्चसेनेत्येवैनं तदाह
मा सुषुप्था ऽ इति मा मृथा ऽ इत्येवैनं तदाहापोशानेत्यमृतं वा ऽ आपो
ऽमृतमशानेत्येवैनं तदाह तद्धैनं मनयाताभमृतं न परिगच्छतीति तथा
हास्य ब्रह्मचारी न कांचनार्त्तिमार्छति न स य ऽ एवं वेद ॥५॥ अथास्मै सा
वित्रीमन्वाह ॥ तां ह स्मैतां पुरा संवत्सरऽन्वाहुः संवत्सरसंमिता वै ग
र्भाः प्रजायन्ते जात ऽ एवास्मिंस्तद्वाचं दध्म ऽ इति ॥६॥ अथ षण्मास्येषु ॥
षड्वा ऽ ऋतवः संवत्सरस्य संवत्सरसंमिता वै गर्भाः प्रजायन्ते जात ऽ एवा
स्मिंस्तद्वाचं दध्म ऽ इति ॥७॥ अथ चतुर्व्विंशत्याह ॥ चतुर्व्विंशतिर्वै
संवत्सरस्यार्द्धमासाः संवत्सरसंमिता वै गर्भाः प्रजायन्ते जात ऽ एवास्मिं
स्तद्वाचं दध्म ऽ इति ॥८॥ अथ त्र्यहे साह ॥ द्वादश वै मासाः संवत्सर

प्र२१२

रस्य संवत्सरसम्मिता वै गर्भाः प्रजायंते जातऽएवास्मिंस्तद्वाचं दधमऽइति ॥९॥
अथ षडहे ॥ षड्वाऽऋतवः संवत्सरस्य संवत्सरसंमिता वै गर्भाः प्रजायंते
जातऽएवास्मिंस्तद्वाचं दधमऽइति ॥१०॥ अथ त्र्यहे ॥ त्रयो वाऽऋतवः
संवत्सरस्य संवत्सरसंमिता वै गर्भाः प्रजायंते जातऽएवास्मिंस्तद्वाचं
दधमऽइति ॥११॥ तदपि श्लोकं गायंति ॥ आचार्यो गर्भी भवति हस्तमाधा
य दक्षिणं ॥ तृतीयस्यां स जायते सावित्र्या सह ब्राह्मणऽइति सद्यो हैव
ब्राह्मणायानुब्रूयादाग्नेयो वै ब्राह्मणः सद्यो वाऽअग्निर्जायते तस्मात्स ॥२५॥
॥२५॥ द्यऽएव ब्राह्मणायानुब्रूयात् ॥१२॥ तां हैतामेके सावित्रीमनुष्टुभमन्वा
हुर्वाग्वाऽअनुष्टुबेतदस्मिन्वाचं दधमऽइति न तथा कुर्याद्यो हैनं तत्र
ब्रूयादन्वाऽअयमस्य वाचमदित मूको भविष्यतीतीश्वरो ह तथैव स्यात्
28 तस्मादेतां गायत्रीमेव सावित्रीमनुब्रूयात् ॥१३॥ अथ हैक आहुः दक्षिणतः
तिष्ठते वासीनाय वान्वाहुरिति न तथा कुर्याद्यो हैनं तत्र ब्रूयाद्बहिर्न्वाऽअय
मिमं सजीजनत बहिर्धोन्नविष्यतीतीश्वरो ह तथैव स्यात्तस्मात्पुरस्तादे
व प्रतीक्षमाणायानुब्रूयात् ॥१४॥ तां वै पच्छोऽन्वाह ॥ त्रयो वै प्राणाः
प्राणोऽदानो व्यानस्तानेवास्मिंस्तद्दधाति यथा [illegible] वाऽइमौ

प्राणो प्राणोदानावेव प्राणोदानावेवास्मिंस्तद्दधात्यथ कृत्स्नमेको वा
अयं प्राणः कृत्स्न एव प्राणमेवास्मिंस्तत्कृत्स्नं दधाति ॥१५॥ तदाहुः ॥ न ब्रा
ह्मणं ब्रह्मचर्यमुपनीय मिथुनं चरेद्गर्भो वा एष भवति यो ब्रह्मचर्यमुपै
ति नेदिमं ब्राह्मणं विच्छिन्नादृतं सा जनयानीति ॥१६॥ तदु वा अप्याहुः ॥ का
ममेव चरेदृत्व्या वा इमाः प्रजा दैव्या एवमानुष्यस्तावा इमा मानुष्यः
प्रजाः प्रजनना स्रजो यातश्छंदांसि वै दैव्यः प्रजास्तानि मुखतो जनयत
तत एतज्जनयते तस्मादु काममेव चरेत् ॥१७॥ तदाहुः ॥ न ब्रह्मचारी स
न्मध्वश्नीयादोषधीनां वा एष परमो रसो यन्मधु नेदन्नाद्यस्यान्तं ग
च्छानीत्यथ ह स्माह श्वेतकेतुरारुणेयो ब्रह्मचारी सन्मध्वश्नंस्त्रय्यै
वा एतद्विद्यायै शिष्टं यन्मधु स तु रसो य एवं वेद शिष्टमिति यथा ह वा
ऋचं वा यजुर्वा सामवाभिव्याहरेत्तादृक्तदेव य एवं विद्वान्ब्रह्मचारी स
न्मध्वश्नाति तस्मादु काममेव मध्वश्नीयात् ॥१८॥ ब्राह्मणम् ॥६॥ देवान्वा
ऊर्ध्वांस्स्वर्गं लोकं यतः ॥ असुरास्तमसान्तरदधुस्ते होचुर्न वा अस्या
न्यन सत्रादपघातास्ति हन्त सत्रमासामहा इति ॥१॥ ते रात्रिमेवा

अध्या२

मꣳ सत्रमुपेयुः ॥ तद्यावद्वासीनः परापश्येत्तावत्तस्मोपाघ्नत तेवमेव त्रातोह्येन
यावत्तिष्ठन्परापश्येत्तावत्तस्मा पाघ्नत ॥२॥ ते हाब्रुवन् अपवांवत मोहन्म
ह नत्वेव सर्वमिव हन्त प्रजापतिं पितरं प्रसयामेति ते प्रजापतिं पितरं प्रती
त्याब्रुवन् असुरा वै नो भगवः ऊर्ध्वाः स्वर्गं लोकं यतस्तमसान्तरदधुः ॥३॥
तञ्चतातिरात्रिं सत्रमुपेम ॥ तद्यावदासीनः परापश्येत्तावत्तस्मोपा
हन्म स्थिव्रमेव त्र्यहेन यावत्तिष्ठन्परापश्येत्तावत्तस्मोपाहन्मथ हि
प्र नो भगवं छाधि यथासुरांस्तमोपहत्य सर्वं पाप्मानमपहत्य स्वर्गं लो
॥२६॥ कं प्रज्ञास्यामऽ इति ॥४॥ स हौवाच ॥ अस्य चेक्तृतन्यां वै यज्ञान्या मगं तय ॥२६॥
दग्निष्टोमेन त्वाच्छिन्नवञ्चतातिरात्रꣳ सत्रमुपेत ततोऽसुरांस्तमोपहत्य
29 सर्वं पाप्मानमपहत्य स्वर्गं लोकं प्रज्ञास्यथेति ॥५॥ ते चतातिरात्रꣳ सत्रमु
पेयुः ॥ तेनासुरांस्तमोपहत्य सर्वं पाप्मानमपहत्य स्वर्गं लोकं प्रजज्ञु
स्तेषां मर्वा क्वैवाशोष्व बाहः स्वहर त्रिरात्रि स॥ मा ति परीयरात्रिमत्यहः
सामानि ॥६॥ ता हाब्रुवन् अस्तु हामेव न प्रजानीमो हन्त प्रजापतिमेव
पितरं प्रत्ययामेति ते प्रजापतिमेव पितरं प्रतीत्याब्रुवन् अहन्नो रात्रिसा
मानि रात्र्या मह्नान्नवेति नः ॥ विपर्षि घना न्मुग्धान्विद्याधीरानुत्साधिनः

इति ॥७॥ तन्नेहैतदुपजगौ ॥ महाहिमिवावेदाद्धवीयान न्नवेस्य ॥ अनुत्त
अनुत्तस्वादास्थानात्ततः सत्रं नतीयतऽइति ॥८॥ अश्विनं ह्वेवः शस्यमानं प्रा
प्रातरनुवाकमास्थानादनुत्तं यथास्थानोदद्धेधीरः संतोऽध्धीरवत् ॥
प्रशास्त्रातमुपतशाश्लानेरप्रतिशंसतति ॥९॥ तदाहुः ॥ कथन्नुन गवः
शस्तं कथमप्रतिशस्तमिति साहावास्य यत्र होताश्विनं शंसन्नौगेय
स्यत्रातागौ यत्र स्यर्छेदसः पारगछान्तद्यति प्रस्थाता चसतीवरीः परि
हृत्य मित्रावरुणस्य हविर्धानयोः प्रातरनुवाकमुताकुरुताइत्यु होता
शंसति शाने रितराजंजप्यमानऽइवान्वाहैतन्न ग्रावा ग्रावस्तु प्रत्यति
नछेदसा छेदः ॥१०॥ परिहितेप्रातरनुवाके ॥ यथा यतनमावापा
वश्चेत यर्मिमा उद्धृत्य द्रोणकलशे पवित्रं प्रपीड्य निदधाति ताराहृत्य च
रित्वा प्रत्यंचः प्रतिपरेत्य तिरोह्याने वहन्नाचयाधाऽथानुछ्याय
पुरछें सर्वेष्ठापयप्रऊ धाऽथेत यर्मिमा उद्धृत्य नरहीत्वा भ्विपुषा
कृत्वा संततं निंबबुहिषप वमानेन स्तुवाद[illegible]ति र वप्रालिपद्याधाऽइति
॥११॥ तदेत तिश्लोकाः ॥ चतुर्भिः सिंधाविच्छृत्किन्दीराद्यजद्रुस्तमः ॥ वि
द्धांसोय शतक्रतुदेवाः सत्रमतन्वतति ॥१२॥ ब्रह्मा राह्वपत्रयुक्ता

नवंति॥ द्वाप्राताता रोद्वावद्वर्युपवेर्नश्च केवलन्ननि कल्पयन्नको
रंता व्यतिषजं धीरा॥ नदान्खायद्भि यं ततुमखांह्नि जानीमो व्वितत म्मोह
यंति नः॥ पूर्वस्या कोः परिख्यिः ठेति कर्मतद्युत्तरल्णालिद्धि तब्व तेक्षा॥ दु
द्विद्भा नंकाव्येदवतानां सोमाः सामेव्यति बिक्षाः लवं ता॥ समानांत्स
दमुद्धंति हया न्काष्ठन्नता यथा॥ पूर्वान्यरिश्रुतः कुं लंजनमेजयसाध्येः
दृत्यसुररद्दे सोन्याप युः॥१३॥ ब्राह्मणम्॥७॥ पंचैव महायज्ञाः॥ ता
॥कु॥ न्येव महासत्राणि तत्र यज्ञो मनुष्ययज्ञः पितृयज्ञो देवयज्ञो ब्रह्म ॥उ॥
यज्ञ इति॥१॥ अहरहर्भूतेभ्यो बलिं हरेत्॥ तथैतं भूतयज्ञं समा
प्नोत्यहरहर्दद्यादोदपात्रात्तथैतं मनुष्ययज्ञं समाप्नोत्यहरहः
स्वधाकुर्यादोदपात्रात्तथैतं पितृयज्ञं समाप्नोत्यहरहः स्वाहा
30 कुर्यादाकाष्ठात्तथैतं देवयज्ञं समाप्नोति॥२॥ अथ ब्रह्मयज्ञः॥ स्वा
ध्यायो वै ब्रह्मयज्ञस्तस्य वा एतस्य ब्रह्मयज्ञस्य वागेव जुहूर्मन उ
पभृच्चक्षुर्ध्रुवा मेधा स्रुवः सत्यमवभृथः स्वर्गो लोक उदयनं या
वंतं ह वा इमां पृथिवीं वित्तेन पूर्णां ददल्लोकं जयति त्रिस्तावन्तं जयति

नुयाऽ संवाहत्यं यऽएवं विद्वानहरहः स्वाध्यायमधीते तस्मात्स्वाध्यायो
ध्येतव्यः ॥३॥ पयसऽआहुतयो हवाऽएता देवानां ॥ यदृचः सयऽएवं विद्वानृचो
हरहः स्वाध्यायमधीते पयसऽआहुतिभिरेव तद्देवांस्तर्पयति तऽएनंतृप्ता
स्तर्पयंति योगक्षेमेण प्राणेनरेतसा सर्वात्मनो सर्वाभिः पुण्याभिः संप
द्भिः घृतकुल्याः पितॄं स्वधाऽअभिवहंति ॥४॥ आज्याहुतयो हवाऽएता
देवानां ॥ यद्यजूंषि सयऽएवं विद्वान्यजूंषि हरहः स्वाध्यायमधीते ५५
आज्याहुतिभिरेव तद्देवांस्तर्पयति तऽएनंतृप्तास्तर्पयंति योगक्षे
मेण प्राणेन रेतसा सर्वात्मना सर्वाभिः कुल्याभिः संपद्भिः घृतकुल्या
मधुकुल्याः पितॄं स्वधाऽअभिवहंति ॥५॥ सामाहुतयो हवाऽएता
देवानां ॥ यत्सामानि सयऽएवं विद्वान्सामान्यहरहः स्वाध्यायमधीते
सामाहुतिभिरेव तद्देवांस्तर्पयति तऽएनंतृप्तास्तर्पयंति योगक्षे
मेणप्राणेन रेतसा सर्वात्मनासर्वाभिः पुण्याभिः संपद्भि घृतकुल्या
मधुकुल्याः पितॄं स्वधाऽअभिवहंति ॥६॥ मेदऽआहुतयो हवाऽ
एता देवानां ॥ यदथर्वांगिरसः सयऽएवं विद्वानथर्वांगिरसोहरहः

अ०३

स्वाध्यायमधीते मेदऽआहुतिभिरेव तद्देवांस्तर्पयति त एनं तृप्तास्त
र्पयेति योगक्षेमेण प्राणेन रेतसा सर्वात्मना सर्वाभिः पुण्याभिः
संपद्भिर्घृतकुल्या मधुकुल्याः पितॄन्स्वधा अभिवहन्ति ॥७॥ मध्वाहु
तयो ह वा एता देवानां ॥ यदनुशासनानि विद्या वाकोवाक्यमितिहा
सपुराणं गाथा नाराशंस्यः स य एवं विद्वाननुशासनानि वि
७। द्या वाकोवाक्यमितिहासपुराणं गाथा नाराशंसीरित्यहरहः स्वा
ध्यायमधीते मध्वाहुतिभिरेव तद्देवांस्तर्पयति त एनं तृप्तास्तर्पयं ॥३॥
॥३॥ ति योगक्षेमेण प्राणेन रेतसा सर्वात्मना सर्वाभिः पुण्याभिः संपद्भिर्घृत
कुल्या मधुकुल्याः पितॄन्स्वधा अभिवहन्ति ॥८॥ तस्य वा एतस्य ब्रह्म
यज्ञस्य ॥ चत्वारो वषट्कारा यद्वातो वाति यद्विद्योतते यत्स्तनयति यद
वस्फूर्जति तस्मादेवंविद्वाते वाति विद्योतमाने स्तनयत्यवस्फूर्जत्य
धीयीतैव वषट्काराणामच्छम्बट्काराय अति ह वै पुनर्मृत्युं मुच्यते गच्छति
ब्रह्मणः सात्मतां स चेदपि प्रबलमिव न शक्नुयादप्येकं देवपदमधी
यीतैव तथा भूतेभ्यो न हीयते ॥ इत्यारण्यके तृतीयप्रपाठके समाप्तः ॥९॥२॥

अथातः स्वाध्यायप्रशंसा । प्रिये स्वाध्यायप्रवचने भवतो युक्तमना भवत्यपराधीनोऽह
रहरर्थान्साधयते सुखं स्वपिति परमचिकित्सक आत्मनो भवतीन्द्रियसंयमश्चैकारा
मता च प्रज्ञावृद्धिर्यशो लोकपक्तिः प्रज्ञा वर्द्धमाना चतुरो धर्मान्ब्राह्मणमभिनिष्पादयति
ब्राह्मण्यं प्रतिरूपचर्यां यशो लोकपक्तिं लोकः पच्यमानश्चतुर्भिर्धर्मैर्ब्राह्मणं भुनक्त्यर्च
या च दानेन चाज्येयतया चावध्यतया च ॥१॥ ये ह वै के च श्रमाः ॥ इमे द्यावापृथिवी अन्त
रेण स्वाध्यायो हैव तेषां परमता काष्ठा य एवं विद्वान्स्वाध्यायमधीते तस्मात्स्वाध्यायो
ऽध्येतव्यः ॥२॥ यद्यद्ध वा अयं छन्दसः ॥ स्वाध्यायमधीते तेन तेन हैवास्य यज्ञक्रतुने
ष्टं भवति य एवं विद्वान्स्वाध्यायमधीते तस्मात्स्वाध्यायोऽध्येतव्यः ॥३॥ यदि ह वा अ
प्यभ्यक्तः ॥ अलंकृतः सुहितः सुखे शयने शयानः स्वाध्यायमधीत आ हैव स
नखाग्रेभ्यस्तप्यते य एवं विद्वान्स्वाध्यायमधीते तस्मात्स्वाध्यायोऽध्येतव्यः ॥४॥ मधु ह वा ऋ
चः ॥ घृतं ह सामान्यमृतं यजूंषि यदु ह वा अयं वाकोवाक्यमधीते क्षीरौदनमांसौ
दनौ हैव तौ ॥५॥ मधुना ह वा एष देवांस्तर्प्पयति य एवं विद्वानृचोऽहरहः स्वाध्याय
मधीते त एनं तृप्तास्तर्प्पयन्ति सर्वैः कामैः सर्वैर्भोगैः ॥६॥ घृतेन ह वा एष देवांस्त
र्प्पयति ॥ य एवं विद्वान्सामान्यहरहः स्वाध्यायमधीते त एनं तृप्तास्तर्प्पयन्ति सर्वैः कामैः
सर्वैर्भोगैः ॥७॥ अमृतेन ह वा एष देवांस्तर्प्पयति य एवं विद्वान्यजूंष्यहरहः स्वा
ध्यायमधीते त एनं तृप्तास्तर्प्पयन्ति सर्वैः कामैः सर्वैर्भोगैः ॥८॥ क्षीरौदनमांसौ
दनाभ्यां ह वा एष देवांस्तर्प्पयति ॥ य एवं विद्वान्वाकोवाक्यमितिहासपुराणं

मित्यहरहः स्वाध्यायमधीते तऽ एनं तृप्तास्तर्पयंति सर्वैः कामैः सर्वैर्भोगैः ॥९॥ यद्धवा
आपः॥ एत्यादित्यऽ एति चंद्रमा एति नक्षत्राणि यथा ह वाऽ एता देवता नेयुर्न कुर्युर
वं हैव तदहर्ब्राह्मणो भवति यदहः स्वाध्यायं नाधीते तस्मात्स्वाध्यायोऽध्येतव्यस्तस्मा
दृचं वा यजुर्वा साम वा गाथां वा कुंब्यां वाऽभिव्याहरेद्व्रतस्याव्यवच्छेदाय ॥१०॥ ब्रा० ॥१॥
प्रजापतिर्वाऽ इदमग्रऽ आसीत्॥ एकऽ एव सोऽकामयत स्यां प्रजायेयेति सोऽश्राम्यत्स तपो
३२ ऽतप्यत तस्माच्छ्रांतात्तेपानात्त्रयो लोकाऽ असृज्यंत पृथिव्यंतरिक्षं द्यौः ॥१॥ सऽ
इमांस्त्रीँल्लोकानभितताप ॥ तेभ्यस्तप्तेभ्यस्त्रीणि ज्योतींष्यजायंताग्निर्योऽयं पव
ते सूर्यः ॥२॥ सऽ इमानि त्रीणि ज्योतींष्यभितताप ॥ तेभ्यस्तप्तेभ्यस्त्रयो वेदाऽ ॥३२॥
३२॥ अजायंताग्नेर्ऋग्वेदो वायोर्यजुर्वेदः सूर्यात्सामवेदः ॥३॥ सऽ इमांस्त्रीन्वेदा
नभितताप ॥ तेभ्यस्तप्तेभ्यस्त्रीणि शुक्राण्यजायंत भूरित्यृग्वेदाद्भुवऽ इति यजुर्वेदा
त्स्वरिति सामवेदात्तदृग्वेदेनैव होत्रमकुर्वत यजुर्वेदेनाध्वर्यवं सामवेदेनो
द्गीथं यदेव त्रय्यै विद्यायै शुक्रं तेन ब्रह्मत्वमथोच्चक्राम ॥४॥ ते देवाः प्रजा
पतिमब्रुवन् ॥ यदि न ऋक्तो वा यजुष्टो वा सामतो वा यज्ञो ह्वलेत्केन भिष
ज्येमेति ॥५॥ स होवाच ॥ यद्यृक्तो भूरिति चतुर्गृहीतमाज्यं गृहीत्वा गार्हपत्ये जुह
वथ यदि यजुष्टो भुवऽ इति चतुर्गृहीतमाज्यं गृहीत्वाग्नीध्रीये जुहवथान्वाहार्य
पचने वा हविर्यज्ञे यदि सामतः स्वरिति चतुर्गृहीतमाज्यं गृहीत्वाहवनीय

जुहवथ यद्यु ऽअविज्ञातमसत्सर्वाण्यनुद्रुत्याहवनीये जुहवथ तद्धाग्ने द
न्विवर्गं हं स्मि यजन्ति यजुर्विदं न यजुर्विदः सामविदं न सामवेदं स यथा प
र्वणा पर्व संदध्यादेवं हैव स सहि दधाति य ऽएतानि स्मि यजन्ते यथ यो हातान्येनस्मि
यजन्ति यथा ग्रीं स्तेन ग्रीं स्यां संधित्सेद्यथा वा ग्रीं संगरमस्ति निदध्यादेवं
तत्तस्मादेवं विदमेव ब्रह्माणं कुर्वीत नानेवंविदं ॥६॥ तदाहुः ॥ यदृचा होत्रं क्रि
यते यजुषाध्वर्यवं साम्नोद्गीथो यके न ब्रह्मत्वमित्य नया त्रय्या विद्ययेति
ह ब्रूयात् ॥७॥ ब्राह्मणम् ॥२॥ प्रजापतिर्ह्वा ऽएष यद्यज्ञः ॥ सोऽस्यैव ऽआत्मेवा
स्माद्धयं प्रजापतिर्ग्रीवा दाभ्यः स यद्यं भृगं होता दाभ्यं गृह्णन्त्यात्मा
नमेवास्य तत्संस्कुर्वन्ति तस्मिन्नेतां ग्रीवां प्रतिष्ठापयति ॥१॥ अथ मनो ह वा ऽआत्मशुः ॥
वाग्गदाभ्यः प्राणऽएवांशुरुदानो दाभ्यश्चक्षुरेवांशुः श्रोत्रमदाभ्यस्तद्यद
ताय ग्रहान्गृह्णन्ति सर्वं वा पिबृहृत्स्नं तायं ॥२॥ अथ देवाश्च ह वा ऽअसुराश्च ॥
उभये प्राजापत्याः ऽअस्पर्धन्त त ऽएतस्मिन्नेव यज्ञे प्रजापतावस्पर्धन्तास्माकम
यं भविष्यत्यस्माकमयं स्यादिति ॥३॥ ततो देवाः ॥ अर्चन्तः श्राम्यन्तश्चेरुस्त
एतं ग्रहं ददृशुरेतमदाभ्यं तमतन्वत ते सवनानि प्रावृहत ते सर्वं यज्ञं सम
वृञ्जत तेनाराययन्नसुरान्यज्ञात् ॥४॥ ताहाहुः ॥ अदाभ्यमवा ऽएनानिति तस्माद
दाभ्यो नाव नादभ्नुविन्निति तस्माददाभ्यो नाम्यवाऽअदाभ्यः स्य पमदब्धोघा
तेस्मात्तस्माद्ध वादाभ्य ऽएनं हविद्विषाता न्यातेऽयस्य सर्वं यज्ञं स

पृ अष्टा४

हृदः ऽ एवं विद्विद्वंतं त्रातस्य ॥ सर्वस्माद्यज्ञान्निर्भजति बहिर्ध्वा करोति य एवमेतद्वेद ॥५॥
सायाने वपात्रेणा ॥ शुंग्रह्णाति ॥ तस्मिन्नेव पात्रे त्रिग्राव्यो ल्पाप ऽ आनीयत स्मिं
न्नेतानं ॥ शुन्ग्रह्णाति ॥ द्वि ॥ उपयामगृहीतो ऽसि ॥ अग्नये त्वा गायत्रछंदसं ग्र
ह्णामीति गायत्रं प्रातःसवनं तत्प्रातःसवने पूर्वं हन्ती न्द्राय त्वा त्रिष्टुछंदसं ग्रह्णा
33 मीति त्रिष्टुभं माध्यंदिनं ॥ सवनं तन्माध्यंदिने ॥ सवने प्रवृहति विश्वेभ्यस्त्वा
देवेभ्यो जगच्छंदसं ग्रह्णामीति जागतं तृतीयसवनं तत्तृतीयसवनं प्रवृहति
विश्वेभ्यस्त्वा देवेभ्यो जगच्छंदसं ग्रह्णामीति जागतं तृतीयसवनं तत्तृतीयसव
॥३३॥ नं प्रवृहत्यनुष्टुप्ते ऽभिगरऽ इति यद्वाध्वऽर्यु ॥ सवनेष्वनु [illegible] नुष्टुभं तद्देवत ॥३३॥
प्रवृहति तन्नाभि बुलोति च ज्ञो विया वा वामदान्यो नेवाध्वरं ॥ वा ॥ हि नसानीति ॥
ॐ ॥ श्रानवाध्वनोति ॥ द्वेशीनां त्वा पत्मन्ना धूनोमि कुकूननानां त्वा पत्मन्ना धूनो
मि भं दनानां त्वा पत्मन्ना धूनोमि मदिन्तमानां त्वा पत्मन्ना धूनोमि मधुन्तमानां त्वा
पत्मन्ना धूनोमीत्येता वै देवीरापस्त्वथा ऽश्वेव देवीरापो यास्वेमाँ मानुष्य
स्ताभिरेवास्मिन्नेतद्दुन्नर्पनी रसं दधाति ॥ ना ॥ शुक्रं त्वा शुक्रऽआधूनोमीति ॥
शुक्रं ह्येतच्छुक्रऽआधूनोति शुक्र रूप सूर्यस्य रश्मिष्विति तद्दशुक्रोह्येव
नामेतद्रूपं यत्सूर्यस्य रश्मिष्वा धूनोति ॥२॥ ककुभं रूपं वृषभस्य रो
चत वृहदिति ॥ एतद्धि ककुभं रूपं वृषभस्य रोचते वृहद्य एष तपति

शुक्रः शुक्रस्य पुरोगाः सोमाः सोमस्य पुरोगाऽ इति तच्छुक्रमेवैतच्छुक्रस्य पुरो
गां करोति सोमं सोमस्य पुरोगां वत्ते सोमादाज्यं नाम जागर्ति तस्मै वाग्गच्छ
जा मीत्येतद्वाऽ अस्या दाज्यं नाम गृह्णाति यद्वाचमेवैतद्वाचं गच्छतीति ॥१०॥ अथोप
पतिष्क्रम्य जुहोति ॥ तस्मिंत सोमा सोमाय स्वाहेति तत्सोमानामेवैत सोमाय
जुहोतीति तथो ह्यत्र मारो न प्रचरन्त्य यदि ह पत्यमेतानि यानि सर्वथा देवबंधुस्त
स्यतावती एव दक्षिणा यावतीरग्नीध्रः ॥११॥ अथाभि नु तरूपज्जोति ॥ उशि ६
ग्रौ देव सोम गायत्रैः प्रियं पाथो पीहि ... देव सोम इन्द्रस्य प्रियं पाथो पीहि अस्मत्सखा
... देव सोम विश्वेषां देवानां प्रियं पाथो पीहीति सवनानि वाऽ अर्द्धः प्रदहति ता
न्यावितत्स्वनराप्याययति यस्तिस्य तयामानि करोति ते रयातयामेर्वैहं तन्वते ॥१२॥
॥ ब्राह्मणम् ॥३॥ अध्यायः ॥ नरुद्दह विद्यारुत्तिः ॥ वरुणावित रंध्रिय याति मन्नेतद्य
॥ ब्रा ... कारातिर्विमा निधियामन्यतऽ इति ॥१॥ स हो वाच ॥ प्रथुं त्रकव्रज
वरुणा ध्रिदोत्र ... स्य [redacted] व्रज
ताच्च त्र यु स [redacted] ई प्रांचौ दक्षिणां व्रजतात्तत्र यत्यत्स्येस्तद्द्रष्टाप्रस्य ग्व्रज
तो च त्र य त्य त्स्येस्तद्द्रष्टादग्व्रजताच्चत्र यत्य त्स्येस्तद्द्राष्टं तयोः पुर्थियारुत्त
र मुन्चवांतरादशो व्रजताच्चत्र यत्य त्स्येस्त न्मऽ आवचनीयो ऽइति ॥२॥ स हैतत
एव प्राङ्व व्राज ॥ एड पुरुषेः पुरुषान्यत्र्वीत्ये ... पच्यंतोः संव्रश्चपर्व

अग्ना४

त्वा छित्त्वा जम्भासानिदं तवेदं ममेति स होवाचनीक्ष्मं बत नोः पुरुषा न्वाऽएत
स्मुरूषाः पर्वाण्येषां पर्वशः संवृश्च्य पर्वशो व्यजनन्तातिति तान्हैवु रिच्छं वाऽ
इमस्मान्नमुष्मिंल्लोके सचन्तेता न्वयमिदं मिह प्रतिसचामहाऽ इतिस
होवाचास्तीहप्रायश्चित्ती३रि स्यस्तीति का तिपिता तत्रे दति।।३।। स हततस्त
३५ एव दक्षिणा प्रवव्राज।। एकु पुरुषैः पुरुषा न्पर्वाण्येषां पर्वशः संकर्तं प
व च्छित्वा छित्त्वा जम्भाना निदं तवेदं ममेति सहोवाचेन्नीक्ष्मं बत नोः पुरुषा न्वाऽएत
स्मुरूषाः पर्वाण्येषां पर्वशः संकर्तं पर्वशो व्यजनन्तातिति तान्हैवु रिच्छं वाऽ
।।३५।। इमस्मा नमुष्मिंल्लोके सचन्तेता न्वयमिदं मिह प्रतिसचाम हाऽइति सहो ।।३५।।
वाचास्तीहप्रायश्चित्तीरि स्यस्तीति कातिपितवातत्त्वा दति।।४।। स हततस्त
एव प्रत्यङ्व व्राज।। एकु पुरुषैः पुरुषांस्तूष्णीमासीनांस्तूष्णीमासीनैरद्यमा
नांस्स होवाचनीक्ष्मं बत नोः पुरुषा न्वाऽएतस्मुरूषास्तूष्णीमासीनांस्तूष्णीमा
सीनाऽ अदंतीति तान्हैवु रिच्छं वाऽइमस्मा नमुष्मिंल्लोके सचन्तेता न्वयमिदं
मिह प्रतिसचामहाऽइति सहोवाचास्तीहप्रायश्चित्तीऽ३ स्यस्तीति काति
पितेवातत्त्वादति।।५।। स हततऽ एवोदङ् व्राज।। एकु पुरुषैः पुरुषाना
क्रन्दयतऽ आक्रन्दयतो दन्तीति सहोवाचर्नैं वाऽइमस्मा नमुष्मिं
ल्लोके सचन्तेता न्वयमिदं मिह प्रतिसचाम हाऽइति सहोवाचास्तीहप्रायश्चित्तीऽ३
आक्रन्दयद्भिरद्यमानांस्स होवाचर्नीक्ष्मं बत नो पुरुषा न्वाऽएतस्मुरूषानाक्रन्दयतः

रित्यस्तीति काति पितेवने वादति ।।६।। सहततऽएवैतयोः सर्वदेशयोः ।। उत्तरमन्व
वांतरदिशं प्रवव्राज उदुस्त्रियेकल्याणी वाति कल्याणी चातऽन्तराले पुरुषः
३ रूपः पिंगाक्षो दंपाति स्तस्मिन्तं हैनेद्दृष्ट्वानी विविदसाहस्य संविवेश तं
ह पिता वाचार्यो धीषस्वाध्यायं कस्मान्नु स्वाध्याय न्तो धीषऽ इति सहोवाच किम
ध्येष्ये न किंचनास्तीति तद्ध पुरुषाणां विदांचकार अध्याय इति ।।७।। सहोवाच ।।
या न्वेतस्यां दिश्य प्राच्यां पुरुषैः पुरुषान्पर्वाश्यषांपर्वशः संवृश्च्य पर्वाशा
वि न जमानानि दं तानु दंमामिति वनस्पतयो वितऽन्ववं स यद्वनस्पती
नां समिधमादधाति तेन वनस्पतीनवरुंधे तेन वनस्पतीनां लोकं जयति ।।८।।
अथ यान तद्दक्षिणायां दिश्य प्राच्यां पुरुषैः पुरुषान्पर्वाल्पेषांपर्वशः संक
र्तंपर्ववर्णो विनजमानानि दं तवेदंममेति पशवो वितऽन्ववं स यत्पशु साद्धहोति
तेन पशूनवरुंधे तेन पशूनां लोकं जयति ।।९।। अथ याने तस्यां प्रतीच्यां दिश्य प्राच्याः ।।
पुरुषैः पुरुषांस्तूष्णीमासीनांस्तूष्णीमासीनेरद्यमाना न्नोषध्यो वितऽन्व
वं स यत्तूष्णीमास्ते नावज्योत यति तेनौषधीरवरुंधे तेनौषधीनां लोकं जयति
।।१०।। अथ याऽनित दुदीच्यां दिश्य प्राच्याः पुरुषैः पुरुषानाक्रंदयतोऽक्रंदय
द्भिरद्यमानानापो वितऽन्ववं स यदपः प्रत्यानयति तेनापो वरुंधे तेनापां

अ.श.१४

लाकं जयति॥११॥ अथ येऽरते त्रियावश्राद्धी:॥ कल्याणीं वाति कल्याणीं च सा वाक
ल्याणीसा श्रद्धा स य एतां वीमा कृतिं जुहोति तन श्रद्धामेवरुंधे तेन श्रद्धांजयत्य
थ याति कल्याणी सा श्रद्धा स य एतुत्तमामा कृतिं जुहोति तन श्रद्धामेवरुंधे तेन
श्रद्धां जयति॥१२॥ अथ यऽएन॥ सांतरे लघुरुषः कृष्ण: पिंगाक्षो दंडपाणि रस्यो
35 क्रोधो वैसोऽन्तस्य यजुच्य पश्चानीयन्नियति तन क्रोधमेवरुंधे तेन क्रोधं
जयति स यऽएवं विद्वानग्निहोत्रं जुहोति तन सर्वं जयति सर्वमेवरुंधे॥१३॥
॥ब्राह्मणम्॥४॥ जनको हा वैदेहः॥ ब्राह्मणैर्ध्वावयज्ञि: समाज गामश्वेतकेतु
नारुणायेन सोमशुष्मेण सात्ययज्ञिना याज्ञवल्क्येन तान्होवाच कथं कथम
॥३५॥ ग्निहोत्रं जुहुथेति॥१॥ साहवाच॥ श्वेतकेतुरारुणेया घर्माविव सम्राडहमज ॥३५॥
स्रो यशसा दिव्यं दधानावन्यान्यस्मिन्जुहोमीति कथं तदादित्यादित्यो वै घर्म
स्तं सायमग्नो जुहोम्यग्निर्वै घर्मस्तं प्रातरादित्ये जुहोमीति किं स भवति य
एवं जुहोत्युजस्रऽएव श्रिया यशसा भवत्य तयोश्च देवतयो: सायुज्यं सलो
कतां जयतीति॥२॥ अथ हा वाच सोमशुष्म: सात्ययज्ञि:॥ तेजऽएव सम्राड्ते
जस्विञ्जुहोमीति कथं तदित्यादित्यो वै तेजस्तं सायमग्नौ जुहोम्यग्निर्वै त
जस्तं प्रातरादित्ये जुहोमीति किं स भवति यऽएवं जुहोतीति तेजस्वी यशस्वी ना
न्नादो भवत्य तयोश्च देवतयो: सायुज्यं सलोकतां जयति॥३॥ अथ होवाच याज्ञवल्क्य:

ती

यदहमग्निमुद्धराम्यग्निहोत्रमेव तदुद्यच्छाम्यादित्यंवाऽ अस्तंयंतᳪ सर्वे देवा अ
नुयंति तमऽ एतमग्निमुद्धृतं दृष्ट्वा पावर्त्तं तथाहैपात्राणि निर्णिज्योपर्वाप्याग्नि
होत्री [illegible] हविश्चापश्यंन्नुद्यतस्तत्पयामीति त्वं न दिष्ठं याज्ञवल्क्याग्निहोत्रस्यामी
माᳪसिष्ठा धेनुशतं ददामीति होवाच न त्वा वेनायास्त्व मुत्क्रांतिं न गतिं न प्रतिष्ठां न
तृप्तिं न पुनरावृत्तिं न लोकं प्रत्युत्थायिनमित्युक्त्वा रथमास्थाय प्रधावयांचकार ॥४॥
ते होचुः ॥ अति वै नोऽयᳪ राजन्यबंधुरवादीद्धंतैनं ब्रह्मोद्यमाह्वयामहाऽ इति
स होवाच याज्ञवल्क्यो ब्राह्मणा वै वयᳪ स्मो राजन्यबंधुरसौ यद्यमुं वयं
जयेम कमजैष्मेति ब्रूयामाथ यद्यसावस्मांजयेद्ब्राह्मणान्राजन्यबंधुरजैषीदिति नो
ब्रूयुर्मेदमाद्दृढमिति तद्धास्य जज्ञुरथ ह याज्ञवल्क्यो रथमास्थायानुधावयां
चकार तᳪ हान्वाजगाम स होवाचाग्निहोत्रं याज्ञवल्क्य वेदितु३मित्यग्निहोत्रᳪ
ॐ सम्राडिति ॥५॥ ते वाऽ एते आहुती हुते उत्क्रामतः ॥ तेऽ अंतरिक्षमाविशतस्तेऽ
अंतरिक्षमेवाहवनीयं कुर्वाते वायुᳪ समिधं मरीचीरेव शुक्रामाहुतिं तेऽ अं
तरिक्षं तर्पयतस्ते ततऽ उत्क्रामतः ॥६॥ ते दिवमाविशतः ॥ ते दिवमेवाहवनीयं
कुर्वातेऽ आदित्यᳪ समिधं चंद्रमसमेव शुक्रामाहुतिं ते दिवं तर्पयतस्ते ततऽ
आवर्त्तेते ॥७॥ तेऽ इमामाविशतः ॥ तेऽ इमामेवाहवनीयं कुर्वातेऽ अग्निᳪ

अध्या ४

समिधमोषधीरेव श्रद्धामाहुतिं तौ इमां तर्पयतस्ते तत उत्क्रामतः ॥३॥ तौ ते पुरुष
माविशतः ॥ तस्य मुखमेवाहवनीयं कुर्वाते जिह्वां समिधमन्नमेव श्रद्धामा
हुतिं तौ तं तृप्तौ तर्पयतः स य एवं विद्वानश्नात्यग्निहोत्रमेवास्य हुतं भ
वति तत उत्क्रामतः ॥२॥ अर्द्धप्रपाठकः ॥५॥ तौ स्त्रियमाविशतः ॥ तस्या उप
स्थमेवाहवनीयं कुर्वाते धारकां समिधं धारका ह वै नामैषा तया हि प्रजाप
तिः प्रजा धारयां चकार रेत एव श्रद्धामाहुतिं तौ स्त्रियं पतर्पयतः स य एवं
विद्वान्मिथुनमुपैत्यग्निहोत्रमेवास्य हुतं भवति यस्ततः पुत्रो जायते स
लोकः प्रत्युत्थायी तदग्निहोत्रं याज्ञवल्क्य नातः परमस्तीति होवाच तस्मै ह
।३६। याज्ञवल्क्यो वरं ददौ सा होवाच काम प्रश्न एव मे त्वयि याज्ञवल्क्यास इति त ।३६।
तो ह ब्रह्मा जनक आस ॥१०॥ ब्राह्मणं ॥५॥ जनको ह वैदेहः ॥ बहुदक्षि
णेन यज्ञेनेजे स ह गवां सहस्रमवरुरुधे [illegible] वा वितानां ब्राह्मणानां यो ब्र
ह्मिष्ठः स उदजतामिति ॥१॥ स होवाच याज्ञवल्क्यः ॥ अर्वाचीरजता इति
ता होवाच [illegible] त्वं स्विन्नो याज्ञवल्क्य ब्रह्मिष्ठोऽसी इति स होवाच नमो अस्तु
ब्रह्मिष्ठाय गोकामा एव वयं स्म इति ॥२॥ ते ह होचुः ॥ को न इमं प्रक्ष्य
तीति स होवाच विदग्धः शाकल्योऽहमिति तं ह प्रतिख्यायोवाच त्वां

स्विद्मो ह्यां शाकल्य ब्राह्मणाऽउल्मुकावक्षयणमक्रता३ इति ॥३॥ स होवाच ॥ कति
देवा याज्ञवल्क्येति त्रयश्च त्री च शता त्रयश्च त्री च सहस्रेत्योमिति होवाच
कत्येव देवा याज्ञवल्क्येति त्रयस्त्रिंशदित्योमिति होवाच कत्येव देवा याज्ञवल्क्येति
त्रय इत्योमिति होवाच कत्येव देवा याज्ञवल्क्येति द्वावित्योमिति होवाच कत्ये
व देवा याज्ञवल्क्येत्यध्यर्ध इतीत्योमिति होवाच कत्येव देवा याज्ञवल्क्येत्येक
मित्योमिति होवाच कतमे ते त्रयश्च त्री च शता त्रयश्च त्री च सहस्रेति ॥४॥ स होवाच ॥
महिमान एवैषामेते त्रयस्त्रिंशत्त्वेव देवा इति कतमे ते त्रयस्त्रिंशदि
त्यष्टौ वसव एकादश रुद्रा द्वादशादित्यास्त एकत्रिंशदिन्द्रश्चैव प्रजापतिश्च
त्रयस्त्रिंशाविति ॥५॥ कतमे वसव इति ॥ अग्निश्च पृथिवी च वायुश्चान्तरिक्षं चा
दित्यश्च द्यौश्च चन्द्रमाश्च नक्षत्राणि चैते वसव एते हीदं सर्वं वासयन्ते यदिदं
सर्वं वासयन्ते तस्माद्वसव इति ॥६॥ कतमे रुद्रा इति ॥ दशेमे पुरुषे प्राणा
आत्मैकादशस्ते यदास्मान्मर्त्याच्छरीरादुत्क्रामन्त्यथ रोदयन्ति तद्यद्रोदयन्ति
तस्माद्रुद्रा इति ॥७॥ कतम आदित्या इति ॥ द्वादश मासाः संवत्सरस्यैत
आदित्या एते हीदं सर्वमाददाना यन्ति ते यदिदं सर्वमाददाना यन्ति त
स्मादादित्या इति ॥८॥ कतम इन्द्रः कतमः प्रजापतिरिति ॥ स्तनयित्नुरेवेन्द्रो
यज्ञः प्रजापतिरिति कतमः स्तनयित्नुरित्यशनिरिति कतमो यज्ञ इति पशव इति ॥९॥

२८१४

कतमेते त्रयो देवा इति॥ इम एव त्रयो लोका एषु हीमे सर्वे देवा इति कतमौ तौ द्वौ दे
वावित्यन्नं चैव प्राणश्चेति कतमो ध्यर्द्ध इति यो यं पवत इति यदस्मिन्निदं स
र्वमध्यार्ध्नोत्तेनाध्यर्द्ध इति कतम एको देव इति प्राण इति॥१०॥ स होवाच॥
अनतिप्रश्न्यां मा देवतामत्यप्राक्षीः पुरातिथ्यै मरिष्यसि नातस्थीनि चन
37 गृहान्प्राप्स्यन्तीति स ह तथैव ममार तस्य हाप्यन्यन्मन्यमानाः परिमोषिणो
स्थीन्यपजह्रुस्तस्मान्नोपवादी स्यादुत ह्येवं वित्परो भवति॥११॥ ब्राह्मणम्॥ ६॥ अध्यायः॥
पशुबन्धेन यजेत॥ परो वा एष पशुबन्धः स यत्पशुबन्धेन यजते पशुमानेसा
३२॥ नीति तेन गृहेषु यजेत गृहेषु पशुबन्धा इति तानेषु यवसे यजेत तदुय
वसं पशुबन्धा इति जीर्य्यति हविर्जुहोता यजमानस्याग्नयो ग्नीजीर्य्यतानुयत ॥३२॥
मानो यजमानमनु गृहाश्च पशवश्च॥१॥ स यत्पशुबन्धेन यजते॥ अग्नी
न्वा एतत्पुनः संस्कुरुते तेग्नीन्पुनर्नवतामनु यजमानो यजमानमनु गृहाश्च
पशवश्च मुख्या ह वा अस्य एते अग्नय स निष्क्रयमात्मानं नवति मांसीयन्ति ह वे
जुहोता यजमानस्याग्नयस्ते यजमानमेवध्यायन्ति यजमानं संकल्पयं
ति पचन्ति वा अन्य पापिष्ठ हि तथा मांसं स तत्पेतब नातान्यामांसमाशा
छिद्यात स त्स्या वित नवेति॥२॥ स यत्पशुबन्धेन यजते॥ आत्मानमेव
तन्निष्क्रीणीते वीरं वा वीरेण हि पशुर्वीरो यजमानस्य तद्वै ह वि परमम

न्वायं य मा ऽं स ऽं स प र म स्यै वान्वाह स्यै स्यात्तान्न वति तं वै सं वत्सरो ना
नी जानं मती या हायुर्त्वे सं वत्सर ऽऽ आयु ऽऽ एव तद् यतमात्मं धत्ते ॥ ३॥ आवा ७॥
६ हविर्यज्ञ विधो वा ऽऽ अन्यः पशुबंधः ॥ सव विधो न्यः सदि ष हविर्यज्ञ विधो य
स्मि न्न तमु पन यति यस्मि न्न पः प्रतयति यस्मि न्नसं पात्रं नि न यति यस्मि
न्वि स्नु क्रमान्क्रमयत्यथ ह य सव विधो यस्मि न्न तानि न क्रिय ते ॥ ८॥ तद्वाजा॥
इष्टिः पशु बंधाः महा यज्ञा ऽऽ इति महा यज्ञ ऽऽ इति ह ब्रूयाद् दिष्टिं वि तर्हि पशु
बंध मक र्व्यंनमे कद्दे धाऽ इत्येनं ब्रूयात् ॥ १॥ तस्य प्रयाजाऽ एव प्रातः
सवनं ॥ अनुयाजा स्तृतीय सवनं पुरो डाशाऽ एव माध्यंदिनं सवनं ॥ ३॥
तद्धैकि ॥ चूपायां कृतायां दक्षिणायं ति तदु तथा न कुर्यादघ्नीहि न तत्र ब्रू
याद्धविर्यज्ञ अयं प्राणास्याद्दक्षिणाऽ अनेषीन्न प्राणान दद् दंधो वा
मा मीवा बधिरो वा पचहता वान्न विष्यतीतीश्वरो ह तथैव स्यात् ॥ ४॥
रुठ मिव कुर्यात् ॥ पुरो डाशो डायामिवा प हृतायां दक्षिणा नयेत् दं द्रा वा
त॰ ऽऽ यं मध्यतः प्राणः ऽऽ इममेवैतद्दे न मध्यतः प्राणं दक्षिणा भिर्दधाति यस्थि येह
विमाध्यं दिनं सवनं माध्यं दिने वै सवने दक्षिणा नीयंते तस्मात् पुरोडाश डो
यामेवा प हृतायां दक्षिणा नयेत् ॥ ५॥ तदाहुः ॥ अध्वर्यव्याद्धि तस्य ना
नव न्नथो वकल्पते तेक्के नम दिदी क्षऽ इत्याव नथा दन्तु दं ह युरध

प्रश्न ४

युश्च प्रतिप्रस्थाता च होता च मैत्रावरुणश्च ब्रह्मा चाग्नीध्रश्चैते वा ए
षषड्ढोता तमनुद्रुत्य षड्ढोतारं जुहोत्य कामा इति कृत्वा पूर्ववाज्या द्यौ
ष्पृष्ठमंतरिक्षमात्मांगानि यज्ञः पृथिवीं शरीरं ।। वाचस्पतेऽच्छिद्रया वाचाच्छि
द्रया जुह्वा दिवि देवावृधं होत्रामैरयस्वाहेति सवदीक्षा ।। दीक्षा ।। तदाहुः ।।
अध्वर्यो यद्दीक्षितस्यानवस्थावकल्पते क्वेनमवस्थावकल्पते क्वे
नमवस्थमवस्थानवनेष्यसीति स यहृदयमुलेन रस इति सा हि वितस्या
वन्नथश्वाऽाण्वा मुखं कांहस्माहापि गयः ।। विसामेन वा एक[illegible] पशुबंधेन य
जेत ससाम्नानि कद्धि विविसामेऽनामाख्यास्त्रैगायत्रीच्चयोन्नेखा हर त्रैस्यैयत प
।। ३५ ।। सि मत्रिघ्य ततस्पर्शस्य पर्शव्य मिति न्वाऽएतद्वाल्लाणामुद्यतेति विसामेन वा ।
एकेपशुबंधेन यजंते ससाम्ना मिन्नाके सहिवहि सामेन पशु[illegible] बंधेन य ।। ३५ ।।
जते यो ऽन्यपालाशा[illegible]द्यूपं कुरुते यह्येव ससाम्ना मेन पशुबंधेन यजते
यः पालाशं यूपं कुरुते तस्मात्पालाशमेव यूपं कुर्वीत ।। ८ ।। ब्राह्मणम् ।। ८ ।।
सर्व्वऽएष वनस्पती ।। सह्यपश्राव्यस्तस्मात्तादृशं पशुकामो यूपं कुर्वी
ताथ य ऽएष पल्लव प्रासहः सह पश्राव्यस्तस्मात्तादृशं पशुकामो यूपं कु
र्वीत ।। १ ।। अथ यस्यैत द्वक्तस्य सतः ।। कल्पइवाग्रेण वर्तिः सहैकपाती
नाम सयो हतादृशं यूपं कुरुते पुरा हायुषा ऽमुल्लोकमेतितस्मात्ता

दृढा मा युक्ता मो यूपं न कुर्वीत ॥२॥ अथ य एष आनतः । उपरिष्टाद् उपनतो
मध्ये सोऽशनायि रूपं स या हृता दृशो यूपं कुरुते शनायुका हास्येता योजवति
तस्मात्तादृशमशनमन्नाद्यकामो यूपं न कुर्वीताथ य एष आनत उपरिष्टादु
पनतो मध्ये सोऽन्नाद्यस्य रूपं न कुर्वीताथ य एष आनत उपरिष्टादु
पनतो मध्ये सोऽन्नाद्यस्य रूपं तस्मात्तादृशमन्नाद्यकामो यूपं कुर्वीत ॥३॥
॥ब्राह्मणम्॥२॥ स य स्पश्चनायत्त्यमोलोः ॥ एकादशिनि यूपं कुरुते इममेव तेन
लोकं जयत्यथ यद्व्यरत्निं मितं तरिक्षलोकमेव तेन जयत्यथ यत्त्र्यरत्निं
दि दिवमेव तेन जयत्यथ यच्चतुररत्निं दिशो वा एव तेन जयति स वा एष त्र्य
रत्निर्वि वचतुररत्निर्वा पशुबंधयूपो भवत्यथ यो तदुर्ध्वः सोमय
स्य वसो घरस्य ॥१॥ तदाहुः ॥ याजदाज्य नागो नाउइति यद्यादित्या दुश्चदु
खीवाऽएतत्पन्नस्य यदाज्यनागा कि प्रातपुरुषस्य च्युन्यादिस्यादिति यावद्वि
नाग्नि नष्टं स्वनन्नागधेयेन नविनिर्जनं त्यनिर्जन्तुत्वाव सतावन्मन्यतेथ यद्द
वतष्टं स्वनन्नागधेयेन निर्जनं त्यध्वं सप्तनिर्जनको मन्यते सर्वाज्ञ तद्धोता
न्वाहास्नारश्चुः सष्टं स्वजतादिति तादनष्टं स्वनन्नागधेयेन निर्जनाति ॥२॥
एतोऽह पशोः संज्ञप्यमानस्य ॥ हृदयं शूलं समवैति हृदयाच्छूलं तद्य सह
हृदयेन पशुं श्रपयन्ति पुनः पशुं शूलं न विपयीद्दितो पार्श्वतो एवेन त्वको

अग्नावृ तदग्नेरूपं करोति यामुव दधाति तदंतरिक्षस्य रूपं करोति हिरण्यशकलमुव

छि पत्तदस्य श्रपयेत्॥३॥ उपस्तृणीत आज्यं॥ तत्पृथिव्यै रूपं करोति हिरण्यश
कलमुव दधाति तदादित्यस्य रूपं करोत्यथ यदुपरिष्टादभिघारयति तद्दि
39 वो रूपं करोति सा वा एषा पंचावत्ता भवति पांक्तो यज्ञः पांक्तः पशुः पंचर्त
वः संवत्सरस्य तस्मात्पंचावत्ता भवति॥४॥ ब्राह्मणम्॥१०॥ अध्यायः॥ शा
त पथा हवि॥ इदं ह रथचक्रं वा कौलालचक्रं वाप्रतिष्ठितं क्रंददेव ह वा इमे लो
का अध्रुवा अप्रतिष्ठिता आसुः॥१॥ स ह प्रजापतिरीक्षांचक्रे॥ कथं न्विमे
लोका ध्रुवाः प्रतिष्ठिताः स्युरिति स एभिश्चैव पर्वतैर्नदीभिश्चेमामदृंहत् वयो
भिश्च मरीचिभिश्चांतरिक्षं जीमूतैश्च नक्षत्रैश्च दिवं॥२॥ स मह इति व्याहरत्॥
॥३९॥ पद्यावावेमदृंहत्तस्माद्यस्यैतद्बहु भवति भूयिष्ठमस्य कुले महीयते बहु ॥३९॥
वा ह वा अस्यैतद्भवति भूयिष्ठं हास्य कुले महीयते तस्माद्ध्यग्निमा
यतनाद्धेरंचो प्र वायापयेत्पुरग्निहोत्राद्धत्वा मा इदृंहितस्युः प्रतिष्ठित
त्वमति प्रजया पशुभिस्तिष्ठति नायतनाच्च्यवते॥३॥ ब्राह्मणम्॥११॥ चत्वारो
ह वा अग्नयः॥ आहित उद्धृतः प्रहृतो विहृतो यामेव लोक आहितो त
दिमं लोकमुद्धृतोऽथाष्प्रहृतो दिशो विहृतो ऽग्निरेवाहितो वायुरुद्धृत
आदित्यः प्रहृतस्तथेदमा विहृतो गार्हपत्य एवाहितो आहवनीय उद्धृतो
ऽथ यमेतमाहवनीयात्प्राञ्चं प्रणयंति स प्रहृतोऽथ यमेतमुदञ्चं पशु

पत्नायाहरंति यंवापयज्ञाः सद्धि हत्त स्मा स्त्र हाग्निनो पशुबंधेन यजेत ॥१॥ब्रा०१२
तदाहुः॥ किंदेवत्य एष पशुः स्यादिति प्राजापत्यः स्यादित्याहुः प्रजापतिर्वाऽ एतमग्रे
न्यपश्यत्तस्मात्प्राजापत्यऽएव एष पशुः स्यादिति॥१॥ अथोऽ अप्याहुः॥ सौर्यऽ
एव एष पशुः स्यादिति तस्मादेतस्मिन्नस्तमिते पशुर्बध्यते बध्नात्येकान्यथा
गोष्ठमेकऽउपसमायंति तस्मात्सौर्यऽएव एष पशुः स्यादिति॥२॥ अथोऽ अप्याहुः॥
ऐंद्राग्नऽएव एष पशुः स्यादित्येते वे देवतेऽ अन्नवान्यदेवायघात्तो यजते पार
यतऽएव यदि महत्सा यजते पारयतऽएव तस्मादैंद्राग्नऽएव एष पशुः स्यादिति॥३॥
प्राणऽएव पशुबंधः॥ तस्माद्यावज्जीवति नास्यानश्नत् पशुर्नो मीष्टे बध्नाद्यस्मिन्ने
तेन वंति॥४॥ सह प्रजापतिरग्निमुवाच॥ यजे त्वया त्वा लभाऽइति नेति हो
वाच वायुं ब्रूहीति स ह वायुमुवाच यजे त्वया त्वा लभाऽ इति नेति होवाच पुरु
षं ब्रूहीति स ह पुरुषमुवाच यजे त्वया त्वा लभाऽ इति नेति होवाच पशून्ब्रूही
ति स ह पशूननुवाच यजे त्वया त्वा लभाऽ इति नेति होवाच चंद्रमसं ब्रूहीति
स ह चंद्रमसमुवाच यजे त्वया त्वा लभाऽ इति नेति होवाचादित्यं ब्रूहीति स हादि
त्यमुवाच यजे त्वया त्वा लभाऽ इति तथेति होवाच यद्वै तऽएतेनावोचं तत्किं
मुमऽ एतेषु स्यादिति यद्यत्कामयथाऽ इति तथेति तमालभत सोऽस्यायं पशु
रात्तबद्धः स इ होऽध्वयत्ताम ताल्लिय प्रीभिः प्रीभिः प्रीतान्नदादनमेतान्ति

...रूपं करोतीति हि रूप्यं वा...

प्राण

राष्ट्रीन्नि राष्ट्रीन्निरात्ता तस्मादाविष्योनाम तस्माद् उपश्य ८ संद्दत्तं ब्रूयाच्छ्येतान्नुम
द्भूत्तं मिति स यावैव तमश्वे मेघ नेच्छा लोकं जयति तावं तमेनेन जयति ॥५॥
तं प्राची दिक् ॥ प्राणेत्यनु प्राणेत्युपात्तमेवास्मिंस्तद्दधाति दक्षिणा दिग्व्यान
त्यनु व्यानमेवास्मिंस्तद्दधाति प्रतीची दिगपानेत्यनु प्राणादपानमेवास्मिं
स्तद्दधात्युदीची दिगुदानेत्यनु प्राणादुदानमेवास्मिंस्तद्दधात्यूर्ध्वा दिक्स
मानुमास्मि मानेत्यनु प्राणात्समानमेवास्मिंस्तद्दधा तस्माद् उ पुत्रं जातमङ्कृतेना
भिमृश्य ब्राह्मणं ब्रूयाद् दिक्ष्वेनमनुप्राणितेति यद्यु तान्नाविदद् दपिस्वयमेवानु
परिक्रामन्ननुप्राण्यात् स सर्वमायुरेत्या हैव जरसो जीवति ॥६॥ स प्राणमे
॥४०॥ वाग्नेराददत्त ॥ तस्माद् द्वेष्यं नानुपश्यास्मीतो नानुपश्य ज्वलिता ज्वलत्या तो स्य ॥४०॥
प्राणमाहवेद्विषतो भ्रातृव्यस्य प्राणं दत्ते य एवं वेद ॥७॥ रूपमेव ब्रात्योरा
४० ददत्त ॥ तस्मादेतस्य ललयतऽइव विपश्येत्वेति न त्वेवैनं पश्यत्या तस्य स्वरूप ल
माहवेद्विषतो भ्रातृव्यस्य रूपं दत्ते यऽएवं वेद ॥८॥ चित्तमेव पुरुष
स्याददत्त ॥ तस्मादाकुर्द्दिवविचित्तो वदनमामनुष्य चित्तमितास्तस्य स्यस्य चित्त
माहवेद्विषतो भ्रातृव्यस्य चित्तं दत्ते यऽएवं वेद ॥९॥ चक्षुरेव पश्यनामा
ददत्त ॥ तस्मादातच्चाकस्यमानाऽइवैव न जानत्यथ यदावा पद्गोत्यथ
जानन्त्या तस्य हास्यैवं चक्षुराहवे द्विषतो भ्रातृव्यस्य चक्षुर्दत्ते यऽएवं

ष्वेद॥१०॥ त्तामेव चंद्रमसऽआदत्ते॥ तस्मादेतयोः सह ज्ञायोः सतोन्नतरां चंद्रमा
नोत्पत्ता त्ताद्यस्यत्तोऽआ हावं द्विषाता त्रातृव्यस्य त्तां दत्ते यऽएवं वेद तद्य हा
दत्त तस्मादादित्यः॥११॥ ब्राह्मणं॥२३॥ केशि गृहपती नाम सुह॥ सम्राड्दुघां
शार्दूलो जघान स ह स सर्जिताऽआमंत्रयांचक्रे किह प्रायश्चित्तिरिति तेहसु
र्न्ति ह प्रायश्चित्तिरस्ति खंडिकऽएवौद्भारिरस्य प्रायश्चित्तिं विद सऽउ त्वऽए
ता हृद्धिकवकामयात तश्च पापीयऽइति॥१॥ सहोवाच॥ संग्रह तयुजि. म
स्येत्स्यामि स यद्यहमेव च्यति समाप्स्यामि यद्युमामारयिष्यति ष्वहेवि
हमनुविक्रस्यऽइति॥२॥ स हयुक्तायया वोजगाम॥ तऽंह प्रतिख्यायो
वास्व य न्वेतान्येवाजिनानि मृगबुन्नवंत्युपिषां दृष्टी रपि शीर्षपवा
माह हत्वाजि नाम ग्रीवा स्वाबद्धामित्यवमेदम धृषोन्ववस्यंत ३ मिति॥३॥
न्नति होवाच॥ सम्राड्दुघां वाम नगवः शार्दूलावधी त्स य घ्द्हामिव च्यसि
समाप्स्यामि यद्युमामारयिष्यसि यऽइदं हि केष मनु विक्रंस्यऽइति॥४॥
सहोवाच॥ आमंत्रसीया न्वामं त्रयाऽइति तान्हामंत्र्यो वाव यद्य
स्मिन्वच्यामि मुष्ये वेदं प्रजान्न विष्यति न म मनोकीत्वहं न विष्य
बुभुवुऽअस्मैनुव च्यामि मुमेवेद्यस्त्रान वि

२७४

तानि तान्हस्तु मर्मा न गवा वा वा वायंवा व दित्रियस्या ल ऽ इति स द्य वा च ब
द्या न्य वा मूर्ध्वि रा त्रा या नू य स्य ऽ इ ति ॥ ५ ॥ त स्मा ऽ उ ह त द्वस्व ॥ स्व
ती र्हु वा न्या मा ज त ति ब्रू ता त्सो त स म्रा ड्गु घा स्या दि ति चंद्रा त म
न स्व ए णा मि स्वा हा सूर्या न्त च क्षु स्व ए णा मि स्वा हा वा ता न्त प्रा णां स्व
णा मि स्वा हा दि ग्भ्य स्त्व श्रो त्र ७ स्व ए णा मि स्वा हा ऽ द्भ्य स्त्व लो हि त ७
स्व ए णा मि स्वा हा पृ थि व्यै त च्छ री र ७ स्व ए णा मि स्वा हे त्य था न्यो मा ज
त ति ब्रू ता त्सो त स म्रा ड्गु घा स्या दि ति ता त्ता ह व स ऽ उ त्स सा द क
वि नी रे व मा ऽ श्य ते द्वि घ जा जा यं त ॥ ६ ॥ ब्राह्मणम् ॥ ३४ ॥
॥ चतुर्थः प्रपाठकः समाप्तः कण्डिकासंख्या ॥ १०२ ॥ अग्नि काण्डे कण्डिका
संख्या ॥ ५ ३ ॥ अग्नि काण्ड ब्राह्मणानि संख्या ॥ ४२ ॥ इति अष्टाध्यायी एका
दशकाण्ड समाप्ते ॥ श्री नारद्वाज गोत्रोत्पन्न गोपीनाथ पाठकस्यात्मजेन
पाठक श्रीपति ना लेखि ॥ मंगलं लेखकानां च पाठकानां च मंगलं ॥ मंगलं सर्व लोकानां भूमि भूपालमंगलं ॥